श्री०

श्रीगणेशाय नमः ॥ ॥ अथाश्विनशुक्लप्रतिपदि नवरात्रारंभस्तत्र निर्णयः ॥ त
त्र मार्गवाश्विनदीपिकायां देवीपुराणे ॥ सुमेधा उवाच ॥ शृणु राजन्प्रवक्ष्या
मि चंडिकापूजनक्रमात् ॥ आश्विनस्यासिते पक्षे प्रतिपच्छुभे दिने ॥ इ
त्युपक्रम्योक्तं ॥ शुद्धतिथौ प्रकर्तव्यं प्रतिपच्चोर्ध्वगामिनी ॥ आद्यास्तु नाडि
कास्त्यक्त्वा षोडश द्वादशापि वा ॥ अपराह्ने च कर्तव्यं शुभं संततिकांक्षि
भिः ॥ इदं चापराह्नयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदभावविषयं ॥ तथा
तत्रैव देवीपुराणे डामरतंत्रे च देवीवचः ॥ अमायुक्ता न कर्तव्या प्रतिपत्पूज
ने मम ॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥ आद्याः षोडश नाडीस्त्य
क्त्वा यः कुरुते नरः ॥ कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवं ॥ मार्कंडेय देवीपु

द०॥

॥१॥

Acc. NO. ~~536~~M-1637
Title - निर्णयसिन्धु (परिच्छेद दुसरा)
Author - कमलाकर भट्ट
Date - शके 1582.
Sub - धर्मशास्त्र.
Folio - 71
Xerox - 141.

ने०आ०

राणायोः॥ पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी॥ नवरात्रव्रतं तस्यां न कार्यं शु
भमिच्छता॥ देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते॥ नंदायां दर्शयुक्तायां
यत्र स्यान्मम पूजनमिति॥ स्कांदेपि॥ प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवे
त्॥ भाद्रपंचदशी कुर्वंति तया युक्ता न शस्यते॥ विरुद्धफलदा सा हि पुत्रदारक्षया
वहेति॥ तथा॥ वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव॥ द्वितीयाद्विगुणायुक्ता
प्रतिपत्सर्वकामदा॥ तथा देवीपुराणे॥ यो मां पूजयते नित्यं द्वितीयाद्विगुणान्वि
तां प्रतिपद्वारदीक्षा वासोऽस्तु तं सुखमव्ययं॥ यदि कुर्यादमायुक्तप्रतिपत्स्था
पनं मम॥ तस्य शापायुतं दत्वा नस्मशेषं करोम्यहं॥ आग्रहात्कुरुते यस्तु कल
शस्थापनं मम॥ तस्य संपत्तिनाशः स्याज्ज्येष्ठपुत्रो विनश्यति॥ अमायुक्ते न क

॥२॥

तिथ्याप्रतिपच्चंडिकार्चने॥चतुर्थ्यांभिविर्विशेषेणवंशहानिश्चजायते॥नन्दशो
कलयायुक्ताप्रतिपच्चंडिकार्चने।उदयेद्विमुहूर्तापिग्राह्यासोदयदायिनीति।
देवीपुराणे।याचाश्वयुजिमासेस्यात्प्रतिपद्भद्रयान्विता॥शुद्धाममसाचर्चनंतस्याः
रातयज्ञफलप्रदा॥रुद्रयामले॥अमायुक्तासदाचैवप्रतिपन्निंदितामता॥
तत्रचेद्घटपायत्कुर्यान्नेदुर्भिक्षंजायतेध्रुवं॥प्रतिपत्तुद्वितीयातुकुंभारो
पणकर्मणीति॥यद्यपिरुद्रयामलेडामरेच॥निर्मूलंतथापर्वशेषावा
ष्वाराचेतद्वचनान्नोल्लिख्यते॥तिथितत्वेदेवीपुराणेपि॥प्रातरावाह
येद्देवींप्रातरेवप्रवेशयेत्॥प्रातःप्रातश्चसंपूज्यप्रातरेवविसर्जयेत्॥त
त्रैव॥शारत्कालेमहापूजाक्रियतेयाचवार्षिकी॥साकार्योदयगामिन्यांनत

॥२॥

८

3

२३

त्रितिथियुग्मता॥ तथा॥ कुहुकाष्टोपसंयुक्तां च वर्जयेत्प्रतिपत्तिथिं॥ राज्यनाशाय
याप्रोक्ता निंदिता चाश्च पूजने इति पृथुवचनेषु कलशस्थापनग्रहणात्त
दर्शप्रथमदिने निषिध्यते तत उपवासादौ तस्य प्रतिपद्व्यपमाख्येति युग्मवा
क्यात्॥ शुक्लायास्प्रतिपत्तिथिः प्रथमतः इति दीपिकोक्तेः शुक्लपक्षदर्शे
द्वितीया प्रवर्त्तौ केव्य पूर्वदिने प्राप्तस्य वा वेमानाशाद्वादितिके चित्॥ व
स्तुतस्तु पूर्वोक्तवाक्येषु चंडिकार्चनपूजनग्रहणादुपवासादेश्चागत्वात्स
वानदेवीपूजादावपि परेति युक्तं॥ कलशस्थापने ग्रहणारूपलक्षणं श्र
तपवदेवं॥ व्रतोपवासनियमे घटिकैकापि या भवेत्॥ सा तिथिस्तद्दि
ने पूज्या विपरीता तु पैतृके इति॥ यदा तु पूर्वदिने संपूर्णाष्टु द्वितीया चन्द्रे वो

२४

॥३१॥

परदिने च वृद्धिते तदा संपूर्णा चादमायोगाभावाच्च पूर्वैव वा यानि च द्वितीयोग
नित्रोधकानि वचनानि केचित्पठंति नान्यापस्तु द्वोधिकानि वेधपराणि॥
परदिने प्रतिपदाऽस्यं तासच्चेदुदयेयुतापि पूर्वैव ग्राह्या॥ तदाह लल्लः।
तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति॥ यानि च
मायुक्ताप्रकर्तव्यं यादीनि च सिद्धप्रसादवचनानि तानि समूलत्वे सत्यत्तदि
षयाणि॥ अत्र च देवीपूजैव प्रधानं उपवासादि त्वंग॥ अष्टम्यां च नवम्यां च
गजन्मातरमंबिकां॥ पूजयित्वाश्विने मासि विशोको जायते नर इति॥ दुर्गा
द्राभविष्ये॥ तस्याप्येव फलसंबंधात्॥ नवमीतिथिपर्यंतं वृद्ध्या पूजा जपादि
कमितितत्रैव देवीपुराणाच्च॥ पूर्वैव वचनात् अष्टमी नवमी पूजैव प्रधानमन्य

॥३१॥

८

सर्वमंगलमिति गौडाः॥ सा च काम्या नित्या चाप्येवमन्यैरपि तथा देव्याः कार्यं
पूजनं॥ विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकमिति॥ यो मोहादथवालस्याद्दे
वीं दुर्गां महोत्सवे। न पूजयति दंभाद्वा द्वेषाद्वाप्यथ भैरव॥ क्रुद्धा भगव
ती तस्य कामानिष्टान्निहंति वै इति कालिकापुराणे फलनिंदाश्रुतेः॥ वर्षे व
र्षे विधातव्यं स्थापनं च विसर्जनमिति तिथितत्त्वे देवीपुराणाच्च॥ अत्रोप
वासादि फलमुक्तं हेमाद्रौ भविष्ये एवं च विंध्यवासिन्यां नवरात्रोपवास
तः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ पूजनीया जनैर्देवी स्थाने स्था
ने पुरे पुरे॥ गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने॥ स्नातैः प्रमुदितैर्हृष्टै
र्ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः॥ इति॥

॥४॥

यत्नभविष्यं ॥ एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिरिति तामसपूजापरं ॥
विनामंत्रैस्तामसी स्यात्किरातानांतु संमतेति तत्रैवोक्तेः ॥ मदनरत्ने देवीपुराणे
पि ॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां ॥ अयाची त्वथवैकाशी नक्ता
शी वाथवा व्रतः ॥ प्रातःस्नायी तथा मंत्र्यक्कुमारी भोजयेन्मुदा ॥ वस्त्रालंकार
दानैश्च संतोष्याः प्रतिवासरं ॥ बलीं च प्रत्यहं दद्यादोदनं माषमाषवत् ॥
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायण इति ॥ नंदिका प्रतिपदिति मैथि
लाः ॥ षष्ठीति गौडाः ॥ तत्र पूजनं रात्रौ कार्यं ॥ आश्विने मासि मेघांते महि
षासुरमर्दिनी ॥ निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् ॥ इति विष्णु
राणात् ॥ संग्रहेपि ॥ आश्विने मासि मेघांते प्रतिपद्यां तिथौ नवे ॥ तस्यां

॥४॥

८

नक्तं प्रकुर्वीत रात्रौ देवीं च प्रजयेत् ॥ रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ॥ रात्री
व्रतमिदं देवी सर्वपापप्रनाशनं ॥ सर्वकामप्रदं नृणां सर्वैश्वर्यविवर्द्धनं ॥ रात्रिव्र
तमिदं तस्य रात्रौ कृते व्रते ध्यते ॥ नक्तव्रतमिदं यस्मादन्यथा नरके गतिरित्यादिवच
नाच्च ॥ रात्रिव्रतत्वमेवाभिप्रेत्य माधवेनोक्तं तस्य नक्तव्रतत्वादिति ॥ न तु रात्रिभो
जनात् ॥ ननु मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ॥ संपूज्य नवदुर्गां च नक्तं
कुर्यात्समाहितः ॥ नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं ॥ आरंभे नवरात्रस्ये
त्यादि स्कांदात् ॥ माधवेनोक्तं च नक्तमेव प्रधानमिति चेत् ॥ नवरात्रोपवास इत्या
देरन्यपरत्वात् ॥ तेन पादीके नक्तानुवादोयं ॥ न तु रात्रेः कर्मकालत्वेत व्यापिनी ए
वेति प्रतिपत्ग्राह्या स्यात् ॥ मैवं ॥ न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् ॥ यथा पूर्वेद्युः

॥५॥

कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्राप्तं यथा वा निशी
थसतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणीयुता परैवेति माधवेनोक्तं तथात्रापि।
वस्तुतस्तु रात्रेः कर्मकालत्वं वचसा हेमाद्र्याद्युल्लिखनात् समूलत्वाविस्मरणं च

मेव त्रिकालपूजयेदित्यादिपूर्वोविरोधाच्च। माधवोक्तिस्तु पाद्मिकेन तो ह्युवा
द इत्युक्तं॥ तस्मात् सर्वपक्षेषु परैवप्रतिपदिति सिद्धं॥ अत्र केचिन्नवरात्रश
ब्दो नवाहोरात्रपरः॥ चन्द्रह्रासे समाप्तिरष्टम्यां ह्रासे मा प्रतिपन्निशि। प्रारंभो नव
वृद्ध्यास्तु नवरात्रमतोऽर्थवदिति देवीपुराणादित्याहुः॥ तन्न॥ अतिह्रासवृद्ध्यो
न्यूनाधिकत्वापत्तेः॥ अत्र मूलाभावाच्च तेन तिथिवाच्येवायं॥ तदुक्तं तिथिवृ
द्धौ तिथिह्रासे नवरात्रमपार्थकं॥ अष्टरात्रे न दोषोऽयं नवरात्रतिथिःक्षयेति स

॥५॥

च नवरात्रशब्दः कृचिल्लक्षणया कर्मवाची। यथा। प्रारंभो नवरात्रस्येत्यत्रेति दिक्।
प्रतिपद्विवेकश्च्यादियोगनिषेधो भार्गवार्चनदीपिकायां देवीपुराणे॥ त्वाष्ट्रवैधृ
तिचित्राचेत्प्रतिपच्चंडिकार्चने। तयोरंते विधातव्यं कलशारोपणं गृहे॥ चित्रावै
धृतियुतापि द्वितीयायुता चेत्सैव ग्राह्येत्युक्तं दुर्गोत्सवे। नद्रान्विता वैधृतिप्रत्तु
लभ्यते विरुद्धयोर्योगैरपि संगतातो। स चापराह्णे विबुधैर्विधेयाश्रीपुत्रराज्यादि
विवृद्धहेतुरिति। यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं तत्रैव का
त्यायनेन। प्रतिपद्याश्विने मासि भवे वैधृतिचित्रयोः। आद्यपादौ परित्यज्य प्रारं
भे नवरात्रकमिति। भविष्ये। चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप। त्याज्या द्यंशा
स्त्रयस्त्वाद्यास्तुरीयांशे तु कुर्यात्पूजनमिति। रुद्रयामलेपि। वैधृतौ पुत्रनाशः स्याच्चित्रा
यां धननाशनं॥ तस्मान्नः स्थापयेत्कुंभं चित्रायां वैधृतौ तथा॥ संपूर्णप्रतिपद्येव

॥ दि॥

चित्रायुक्ता यदा भवेत्॥ वैधृत्या वापि युक्ता स्यात्तदा मध्यंदिने रवौ॥ अभिजि
त्मुहूर्तं यत्तत्र स्थापनमिष्यते इति॥ इदं कलशस्थापनं रात्रौ न कार्यं॥ न रात्रौ
स्थापनं कार्यं न च कुंभाभिषेचनमिति मात्स्योक्तेः॥ भास्करोदयमारभ्य याव
त्तु दशनाडिकाः॥ प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु इति विष्णुधर्मोक्ते
श्च॥ रुद्रयामले॥ स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत्॥ शुभामानिम्देति
कामिश्च एवं कृत्वा तु वेदिकां॥ यवांश्चैवापयेत् तत्र गोधूमैश्चापि संयुतान्॥ तत्र सं
स्थापयेत्कुंभं विधिनामंत्रपूर्वकं॥ सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वा॥ इति॥ अ
थ पूजाविधिः॥ सा जयंतीमंत्रेण वा दशार्णेन वा कार्या॥ तदुक्तं दुर्गाभक्तितरंगिण्यां
देवीपुराणे॥ कुर्याद्देव्यास्तु मंत्रेण पूजां दीरघृतादिभिरित्युक्तं॥ जयंती मं
गला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥

॥ दि॥

९

अनेनैव तन्मंत्रेण जपहोमौ तु कारयेदिति। ॐ दुर्गे दुर्गे रक्षणि स्वाहेति नवार्णो।
तत्र प्रतिपदि प्रातरभ्यंगं कृत्वा देशकालौ संकीर्त्य मम सत्जन्मनि दुर्गाप्रीतिद्वारा स
र्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यविच्छिन्नसंततिवृद्धिस्थिर
लक्ष्मीकीर्तिलाभशत्रुपराजयसर्वाभीष्टसिद्ध्यर्थं शारदानवरात्रप्रतिपदि विहि
तकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्ये। इति संकल्प्य। मही द्यौरिति
भूमिं स्पृष्ट्वा। ॐ ओषधयः समिति यवान्निक्षिप्य। आकलशेष्विति कुंभं संस्थाप्य।
इमं मे गंगे इति जलेनापूर्य। गंधद्वारामिति गंधं। या ॐ षधीरिति सर्वौषधीः। का
डात्कांडादिति दूर्वाः। अश्वत्थे व इति पंचपल्लवान्। स्योना पृथिवीति सप्तमृदः।
याः फलिनीरिति फलं। सहिरत्नानीति पंचरत्नानि। हिरण्यरूपमिति हिरण्यं चादि
त्वा। युवा सुवासा इति वस्त्रेणावेष्ट्य। पूर्णा दर्वीति पूर्णपात्रं निधाय। तत्र वरुणं स

१०

९

॥७॥

पूज्या। जीर्णायां नूतनायां वा प्रतिमायां दुर्गां मां वा घटं पूजयेत्॥ तद्यथा॥ पूर्वोक्तमंत्रस्न
त्वा॥ श्री गच्छ वरदे देवी दैत्यदर्पनिषूदनी॥ पूजां गृहाण सुमुखी नमस्ते शंकरप्रि
ये॥ सर्वतीर्थमयं वारि सर्वदेवसमन्वितं॥ इमं घटं समागच्छ तिष्ठ देवगणैः सह॥
दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय। बलिं पूजां गृहाण त्वमष्टाभिः शक्ति
भिः सहेत्यावाह्य पूर्वोक्तमंत्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कू
ष्माण्डादिबलिं वा निवेदयेत्॥ ततः कुमारीपूजा॥ तदुक्तं हेमाद्रौ स्कान्दे। एकैकां
पूजयेत्कन्यामेकवृद्ध्या तथैव वा॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तु वा॥
नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु॥ एकवृद्ध्या लभेत्क्षेममेकैकेन
श्रियं लभेत्॥ एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत्॥ गंधपुष्पफलादी
नां प्रीतिस्तस्या न विद्यते॥ तेन द्विवर्षमारभ्य दशवर्षपर्यंतं पूज्या न त्वन्या।

॥७॥

तासां च क्रमेण कुमारी कात्रिमद्रूते। कल्याणी रोहिणी काली चंडिका शांभवी
दुर्गा सुभद्रेति नामभिः पूजा कार्या। आसां प्रत्येकं पूजामंत्राः फलविशेषाश्च त
त्रैव ज्ञेयाः। सामान्यतस्तासां मंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीं। नवदुर्गात्मि
कां साक्षात्कन्यामावाहयाम्यहं॥ एवमभ्यर्चनं कुर्यात्कुमारीणां प्रयत्नतः। कंचु
कैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः। नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादि
भिः। तथा। ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां॥ जात्यंधां केकरां काणीं कु
रूपां तनुरोमशां। संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां॥ तथा। ब्राह्मणीं स
र्वकार्येषु जयार्थे नृपवंश्यजां॥ लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां॥ दा
रुणे चांत्यजातानां पूजयेद्विधिना नर इति। अत्र वेदपारायणमुक्तं रुद्रयामले।
एवांस्वतुर्वेदविदो विप्रान्सर्वान्प्रसादयेत्॥ तेषां वरणं कार्यं वेदपारायणाय

९

॥८॥

वेरिति। तथा। एकोत्तराभिवृध्यातु नवमीयावदेव ही। चंडीपाठं जपेच्चैव जापयेद्वा
विधानतः। तिथिवृत्त्यैवा रात्री तंत्रोप्रणवबोदितो जप्यास्तोत्रं वा संहितां पठेत्। अं
तेच प्रणवं दद्यादित्येवाचादिपुरुषः। आधारेस्थापयित्वातु पुस्तकं न जपेत्सु
धीः। हस्तसंस्थापनोदेवयस्माद्वै विफलं भवेत्॥ स्वयं च लिखितं यच्च शूद्रे
ण लिखितं भवेत्। अब्राम्हणेन लिखितं यच्चापि लिखितं नवेत्॥ विफलं भ
वेत्। ऋषिछंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः। स्तोत्रेण दृश्यते यत्र प्रणवं त
त्र विन्यसेत्। सर्वत्र पाठ विज्ञेयस्त्वन्यथा। विफलं भवेत्। एवं नवमीपर्यंतं प्रत्य
हं कुर्यात्। अत्रविशेषाहमाड्रौदेवीपुराणे। यदाद्यदिवसे कुर्याच्चंडिकापूज
नादिकं। द्विगुणं तद्द्वितीयेन्हि त्रिगुणं तत्परेहनि। नवमीतिथिपर्यंतं। वृध्या पू
जाजपादिकमिति। एतन्नवरात्रेपूजैवप्रधानं उपवासादिकंगौणमितिगम्यते। ति

॥८॥

८

15

षिद्वासत्तु तिथिद्वयनिमित्तं पूजादि महालयश्राद्धं वेदेकदिने आवृत्त्या कार्यं।
द्विजोत द्वदेवा चयेत्॥ ततः नवरात्रोपवासादिसंकल्पं कुर्यात्। स्वस्याशक्तावन्येन वा
पूजादिकारयेत्। स्वयं वाप्यन्यतो वापि पूजयेत्सुनयी। तेवतितरंगिण्यां देवीपुराणे
ताइदं वदेवीपूजनं स्तुकास्तादावपि कार्यं। तदुक्तं वमपदीपे। नष्टेऽस्तु तस्मै चैतया
जीवसिंहस्थे च वृहस्पतौ॥ कार्या चैव स्वदव्यचोप्रत्यहं कुलधर्मत इति। मल्ल
मासत्तु वचनाभावो न भवति। अत्र च साश्वस्याश्वपूजनमुक्तं मदनरत्ने देवी
पुराणे। आश्वयुक्शुक्लपक्षे तु प्रतिपत्स्वातीयोगशुभेदिने। पूर्वं मुख्ये: श्रवो नाम
प्रथमं स्त्रियमावहत्॥ तस्मात्साश्विने रेस्त त्रपूज्योसौ श्रद्धयासहा पूजनीया
श्वेतुरगा नवमीयां वेदेवहि। शांतिः स्वस्त्ययनं कार्यं तदा तेषां दिने दिने। धान्यं

नल्लतकं कुष्टं वचा सि...द्धार्थकास्तथा। पंचवर्णेन सूत्रेण ग्रंथितेषां तु बंधयेत्॥ वा
यव्यवारुणैः सारैः ग्रा... कैर्मंत्रैः सर्वेषु वै। विश्वदेवैस्तथाज्ये होमः कार्यो दिने
दिने। अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरंगिण्यां भविष्ये। केशसंस्कारद्रव्या
णि प्रदद्यात्प्रतिपद्दिने। पट्टडोरं द्वितीयायां केशसंयमहेतवे। दर्पणं च तृतीया
यां सिंदूरालक्तकं तथा। मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडनं। पंचम्यां पंगरा
गं चशक्त्यालंकरणानि च॥ षष्ठ्यां बिल्वतरौ बोधं सायंसंध्यासु कारयेत्॥ सप्त
म्यां प्रातरानीय गृहमध्ये प्रपूजयेत्। उपोषणमथाष्टम्यां आत्मशक्त्या च पूज
नं। नवम्यां तु ग्रचंडायाः पूजां कुर्याद्बलिं तथा॥ संपूज्य प्रेषणं कुर्याद्दशम्यां सा
रवोत्सवैः। अनेन विधिना यस्तु देवीं प्रीणयते नरः। स्कंदवत्पालयेद्देवी तं पुत्र
वन्नकीर्तिभिः। इत्यतत्त्वार्णवे लैंगे॥ कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेपि

च। नवम्यां बोधयेद्देवीं महाविभवविस्तरैः। शुक्लपक्षे चतुर्थ्यां तु देवीकेश
विमोक्षणं। प्रातरेव तु पंचम्यां स्नापयेत्सु शुभैर्जलैः॥ षष्ठ्यां सायं प्रकुर्वीत बि
ल्ववृक्षेऽधिवासनं। सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं। पूजा च जा
गरश्चैव नवम्यां विधिवद्बलिः। विसर्जनं दशम्यां तु क्रीडाकौतुकमंगलैः।
अत्र नवम्यां बोधनासामर्थ्ये षष्ठ्यां बोधनमिति स्मार्ताः। फलभूयस्त्वार्थिनः
समुच्चय इत्यन्ये। नवम्यां मंत्रः कालिकापुराणे। इषे मासि सिते पक्षे न
वम्यामार्द्रभे दिवा। श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहमिति। अत्रत्यो
व्रते विशेषः परिभाषायां ज्ञेयः। अथाशौचे विशेषनिर्णयः स्मृतौ विश्वरूपनि
बंधे। आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके। शावाशौचे समुत्पन्ने क्रियाः
कार्याः कथं बुधैः। सूतके वर्तमाने च उत्पन्ने सदा बुधैः। देवीपूजा प्रव

तैव्यापृच्छय ज्ञसमसंहितः विधानतः। सूतके पूजनं प्रोक्तं दानं चैव विशेषतः।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते इति। कालादर्शे विष्णुरहस्येपि। पूर्वसंक
ल्पितं यच्च व्रतं सुनियतव्रतैः। तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितं। गौ
डनिबंधे तिथितत्त्वेप्युक्तं। आश्विनशुक्लनवम्यादिशुक्लप्रतिपदादिषष्ठ्या
दिसप्तम्यादिष्वैकं कर्म भतश्च मध्ये आशौचपातोपि न दोषः। संकल्पो व्रतस
त्रयोरिति विश्लेषैरिति। आरब्धं स्वयमेव कोपि अनारब्धं त्वन्येन कारये
दिति दिवोदासः। रजस्वला त्वन्येन कारयेत्। सूतकादि विशेषवचनाभावा
त्। स्त्रीणां च नवरात्रे तांबूलादि न वैर्णं न वातित उक्तं व्रतहेमाद्रौ गारुडे। गंधा
लंकारतांबूलपुष्पमालानुलेपनं। उपवासे न दुष्यंति दंतधावनमंजन
मिति। एतत्सप्तमर्त्कोपवासविषयं। अन्यत्र विशेषः परिभाषा उक्तः। अत्रा

।।१०।। ।।४०।।

श्विनस्य कृ पंचम्यामुपांगललिताव्रतं महाराष्ट्रेषु प्रसिद्धं तत्र यद्यपि कथायां
कालविशेषो नोक्तस्तथापि रात्रौ जागरणं कुर्यादिति नादित्रनिस्वनैरिति रात्रौ
जागरोक्तेः रात्रिपूजायां रात्रौ प्राशस्त्याच्च रात्रिव्यापिनी ग्राह्येति केचित् । व
स्तुतस्तु वचनं विना रात्रिपूजायामानाभावाज्जागरस्य चांगत्वादुग्म वाक्या
त्मकत्वा जागरणेन त्वेकं द्वाचयर्व्यं व्रतेतु यात्तारा व्रतेषु सर्वेषु रात्रियोगो वि
निषिध्यते । इति कालहेमाद्रौ वचनाच्च पूर्वविद्धा ग्राह्या रात्रिशब्दः पूर्वविद्धाव
चन इति हेमाद्रिः । अस्य चतुर्थ्या जागरणरूपत्वादिति साधु प्रतिभाति । आश्वि
नस्य कृष्णपक्षे मूलनक्षत्रे सरस्वतीस्थापनं । यथोक्तं निर्णयामृते देवीपुराणे ।
मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनं । उत्तरासु बलिं दद्यात् श्रवणेन वि

८

सर्जयेदिति।रुद्रयामलेपिमूलऋक्षेसुरावीशापूजनीयासरस्वती॥पूजयेत्सततंदे
वयावद्वैश्रवरूत्तकं।नाध्यापयेन्नचलिखेन्नाधीयीतकदाचन॥पुस्तकेस्थापितेदे
वविद्याकामोद्विजोत्तमः।मूलस्याद्यपादेशैआवाहनमितिवशिष्ठाः।श्रवणाद्य
पादेविसर्जयेत्।आदिनागोनिशायांतुश्रवणस्येयदाभवेत्।संप्रेषणंतदादे
व्यादशम्यांचमहोत्सवइतिचिंतामणौब्रह्मांडपुराणे॥अथषष्ठी।गौड
निबंधेदेवीपुराणे।ज्येष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्रणं।सप्तम्यांमूल
युक्तायांपत्रिकायाःप्रवेशनं।पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं।उत्त
रेणनवम्यांतुबलिभिःपूजयेच्छिवां॥श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेत्।
कालिकापुराणे।बोधयेद्बिल्वशाखायांषष्ठ्यांदेवीफलेषुच॥सप्तम्यांबिल्वशा

स्नातां मातृभ्यः प्रतिपूजयेत्। पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्। जागरं च
स्वयं कुर्याद्बलिदानं महानिशि। पूर्ववत् बलिदानं तु नवम्यां विधिवच्चरेत्। विसर्ज
नं दशम्यां तु कुर्याद्वै सार्ववासवैः। अत्र सर्वत्र तिथिनक्षत्रयोगादयो मुख्यः क
ल्पः। तदभावे तु तिथिरेव ग्राह्या। तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितं। तस्मा
त्तिथिं प्रशंसंति नक्षत्रं न तिथिं विनेति विद्यापतिलिखितवचनात्। तिथिनक्ष
त्रयोर्योगे द्वयोरेवानुपालनं। योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणीति तन्त्रे
व देवलोक्तेश्च॥ अत्र च पत्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यां वा तत्पूर्वदिने
धिवासनं कार्यं। सायंकाले यत्ता सत्त्वे चाधिवासनलोपः। षष्ठ्यां सायं प्रकुर्वीत
बिल्ववृक्षे धिवासनमिति एवं वचनादिति कल्पतरुः। सायं शब्दितिः फला तिरा
यमात्रार्थो न तु कर्मैलोपइत्याचार्यचूडामणिः। अत्र क्रमः। बिल्वसमीपं ग

॥१२॥

त्वादेवीबिल्वं च संपूज्य प्रार्थयेत्तत्र मंत्रः। रावणस्य वधार्थाय रामस्यानुग्रहा
य वा अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा। अहमप्याश्रितः षष्ठ्यां सायाह्
ने बोधयाम्यतः। श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनं। नेतव्योसि मया
गच्छ पूज्यो दुर्गास्वरूपतः। इति एवं देवीमधिवास्य परदिने तिथिमित्रेतिबि
ल्वशाखां पत्री प्रवेशपूजां कुर्यात्। तदुक्तं हेमाद्रौ लैंगे। मूलाभावे तु सप्तम्यां
केवलायां प्रवेशयेत्। युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा। तथै
व प्रतिमां देव्याः स्नात्वाभ्युदयप्रवेशनात्। अत्र चोपवासपूजादावौदयिकी सप्त
मीग्राह्या। न तु युग्मवाक्यात्सर्वो युग्माद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया।
रवेरुदयमिच्छंते न तत्र तिथियुग्मतेति त्यक्तवाणैव वोदाहृतवचनात्। भगव
त्याः प्रवेशादिविसर्गांतास्सर्वाः क्रियाः। तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः

॥१२॥

तितिथितत्त्वे नंदिकेश्वरपुराणाच्च॥ दुर्गाभक्तितरंगिण्यामप्येवं॥ तत्रापि घटिका तोन्यूनत्वेपरा नकार्या॥ व्रतोपवासनियमे घटिकैकापि याभवेदिति॥ देवल्लोक्ते रितिगौडाः॥ दाक्षिणात्यास्तु एवंवचनमदृष्ट्वा युग्मवाक्यात्सर्वो कुर्वंति॥ पत्रिकापू जात्वष्टम्यां एव कार्या न तु सप्तम्यां ...दावित्ति कथ्यते ...णे वेतु रंभा पत्रिकास्तु रंभावच्चीहरिद्रा च जयंती बिल्वदाडिमौ॥ अशोको मानकश्चैव धान्यादी नवपत्रिका॥ इति तंत्रे वोक्ताः॥ अस्यामेव सप्तम्यां देवीत्रिरात्रस्तु होहेमाद्रौ॥ प्रतिपदादिनवतिथिषु उपवासादिकरणासामर्थ्ये सप्तम्यादिनत्रये वा कुर्यात्॥ तदाह वेम्यो॥ आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं प्रतिपदादि क्रमेण यावच्च नवमी भवेत्॥ त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति॥ अत्रापि

अथवा नवरात्रं च सप्तम्यं च त्रिकं दिवा ॥ एकभक्तेन नक्तेन याचितोपोषितैः क्रमादिति ॥
दिवस्यैकरात्रमुक्तं ॥ देवीपुराणे ॥ नवरात्रव्रते शक्तो त्रिरात्रं चैकरात्रकं ॥ व्रतं चरेति
यो भक्त्या तस्मै दास्यामि वांछितमिति ॥ तत्रापि सप्तम्याः पूर्वोक्तो निर्णयः । अत्र ति
थियोगपद्यं तत्रैणोपवासः तिथिद्वयनिमित्तं पूजादिकं तु भेदेन ॥ अत्र विशेषो
निर्णयामृते भविष्ये सप्तम्यां नवगेहानि दारुजानि नवानि च ॥ एकं वा वित्तं भा
वेन कारयेत्सु समाहितः ॥ दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनं ॥ तन्मध्ये वेदि
कां कुर्याच्चतुर्हस्तां समां शुभां ॥ तस्यां सिंहासनं सौम्यं कंबलाजिनसंयुतं ॥ त
त्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां ॥ मुंजैश्च तुभिः रुचिरैः दशाभिर्वा विभूषि
तां ॥ तद्वा हाटकवर्णाभ्यां त्रिनेत्रां शशिशेखरां ॥ अनेन कुसुमाकीर्णां कपर्दी
नसुशोभितां ॥ नितंबबिंबसंनद्धकिंकिणीकाणनादिनीं ॥ स्थलचंद्रदंष्ट्रा

क्तिः वज्रचापपरिधारिणी॥ घंटाक्षमालाकरया नपात्रलसत्करा॥ तदग्रे छिन्नसि
रसं महीषं रुधिराप्लुतं॥ निःसृताई तनुं कंठनाले चर्मासिधारिणा। देवी वृतक
रया वंशशूलेनोरसताडितं। नागपाशेन वद्धिं च सिंहःक्षणाप्रिद्रुतं। वमद्रुधिरव
क्रेण धुन्वतो दैसरान्ननषा॥ सर्वतोमात्रचक्रेण सेव्यमाना सुरैस्तयेति। तत्र
तद्देवी प्रकृत्याहेमीवाराजती तथा॥ भद्रादीलक्षणोपेता खड्गेश्वरलेचपूज
येत्॥ वाक्षीहातुमये देवीमूर्तिस्थापनविशेषो दुर्गा भक्तितरंगिण्यां देवीपु
राणे॥ याम्यास्याशुभदा दुर्गा पूर्वास्या जयवर्द्धिनी॥ पश्चिमाभिमुखी नित्यं न
स्थाप्या सौम्यदिङ्मुखी॥ प्रतिमाभावे विशेषस्तत्रैवाहेमराजतमृद्दारुशै
लचित्रार्पिता वा॥ खड्गेश्वरलेपिता देवी सर्वकामफलप्रदा॥ कृत्यतत्त्वार्णवे का
लिकापुराणे॥ लिंगस्थां पूजयेद्देवीं मंडलस्थां तथैव च॥ पुस्तकस्थां महा

देवीपावकं प्रति मा स्तुचा॥ चित्रं च त्रिशिखं खड्गं जलस्थं चापि पूजयेत्॥ बिल्वपत्रै
र्यजेद्देवीं तथा जातिप्रसूनकैः॥ नालपिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः॥ नगकिं
शामिश्रानैश्च मंगलिंगप्रगीतकैः॥ भगलिंगक्रियाभिश्च प्रीणयेद्दुरचंडिकां॥
परैर्नाक्षिप्यते यस्तु यः परान्नाक्षिपत्यपि॥ तस्य क्रुद्धा भगवती शापं दद्यात्सु दारुणं
विचित्रं म मयाद्दोस्त्रानाद्य संभवेत्तत्रैवोक्तं॥ अंतिकस्थापितं खड्गे स्नाप
येद्दर्पणोप्यवेति॥ अथ सप्तमीपूजाविधिः॥ प्रातः प्रत्युक्तविधिना फलसंकीर्तनी
तेन नवपत्रिकामृन्मयदुर्गापूजाबलिदानानि करिष्य इति संकल्प्य पूर्वे निमं
त्रितबिल्वसमीपं गत्वा संपूज्य॥ आगच्छ सर्वकल्याणीति पूर्वोक्तमंत्रं पठित्वा॥ ॥१४॥
बिल्ववृक्ष महाभाग सदा त्वं शंकरप्रियः॥ गृहीत्वा तव शाखां च देवीपूजां क
रोम्यहं॥ शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो॥ गृहीत्वा तव शाखां च

आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते ॥ दुर्गे दुर्गस्वरूपासि सुरतेजोमयी शुभे ॥ सकलं मे
देवि प्रसीद मम सिद्धये ॥ एह्येहि भगवती सर्वशक्तिस्वरूप जयप्रदे त्रैलोक्ये नवदुर्गा मे

पूज्या दुर्गेति विश्रुता ॥ उत्तिष्ठ पत्रिके देवी सर्वकल्याणहेतवे ॥ पूजां गृहाण सु
कलाम स्माकं वरदा भव ॥ मेरुमंदार कैलास हिमवच्छिखरे गिरौ ॥ जात श्रीफ
लवृक्षत्वं अंबिकायाः सदा प्रियः ॥ इति संप्रार्थ्य छिंधि फट् फट् हुं हुं फट् इत्याहे
ति छित्वा संपूज्य चामुंडे बल इति वाच्य घोषेण देवीं तां च गृहं प्रवेश्य ॥ आरोपि
तासि दुर्गे त्वं मन्मय्यां श्रीफले पित्रे ॥ स्थिरा नितांतं भक्त्या च गेहे त्वं कामदा भव ति
स्थिरीकृत्य रंभादि पत्रिकाः पंचगव्येन पंचामृतेन च संस्थापयित्वा वस्त्रेण वेष्टय ॥
स्थापयेत् ॥ ततः प्रवेशं कल्पं कृत्वा दोलतानादाय देवीमावाहयेत् ॥ तत्र मंत्रः ॥ आवा
हयाम्यहं देवी मन्मय्यां श्रीफले तथा कैलासशिखरं देवी विंध्याद्रिहिमपर्वता
त् ॥ आगत्य बिल्वशाखायां चंडिके कुरु सन्निधिं ॥ स्थापितासि मया दुर्गे द्वजये
चाप्रसीदमे ॥ दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय ॥ यज्ञभागान् गृहाण
दुर्गे देवि सदा स्थिता पत्रवेष्टफलोपेते पुष्प कुसुमे न हेदेः पञ्च वे... स्थिरा देवि पूज
मे सदा प्रसीद मे ०

वृयोगिनीकोटिभिः सहेति ॥ ततो मूलमंत्रेण पाद्यादिगंधांतोपचारैः संपूज्य ॥ अमृ
तोद्भवं श्रीवृक्षं शंकरस्य सदाप्रियं ॥ तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति ॥ द्रो
णपुष्पं निवेद्य धूपादिदक्षिणांतोपजां मूलेन कृत्वा प्रार्थयेत् ॥ ॐ महिषघ्नि
महामाये चामुंडे मुंडमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तुते ॥
कुंकुमेन समालब्धे चंदनेन विलेपिते ॥ विल्वपत्रकृतापीडे दुर्गेहं शरणं ग
तः ॥ रूपं देहि यशो देहि भगवन्भक्तिदे हि मे ॥ पुत्रान्देहि सर्वान्कामांश्च देहि मे ॥
सर्वमंगलमांगल्ये इति च संप्रार्थ्य पत्रिकाः पूजयेत् ॥ कदल्यां ब्रह्माणीं दाडि
मी रक्तदंतिकां ॥ धान्ये लक्ष्मीं हरिद्रायां दुर्गां चामुंडां कचौ कालिकां बिल्वे शि
वां अशोके शोकरहितां जयंत्यां कार्तिकीं मावाह्य संपूज्य दुर्गायै बलिं दद्या
त् ॥ अथ शस्त्रादिपूजा वद्यते ॥ ततः स्तुतिं पठेत् ॥ तदुक्तं शिवरहस्ये ॥ दुर्गां

॥ १५ ॥

त्रिवां शांतिकरी ब्रह्माणी ब्रह्मणः प्रियां॥ सर्वलोकप्रणेत्रिं च प्रणमामि सदा
त्रिवां॥ मंगलां शोभनां शुद्धां निःकलां परमां कलां॥ विश्वेश्वरी विश्वमातां चं
डिकां प्रणमाम्यहं॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां॥ ब्रह्मेशविष्णुनमि
तां प्रणमामि सदा शुभां॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं॥
योगिनीं योगमातां च चंडिकां प्रणमाम्यहं॥ ईशानमातरं देवीमीश्वरीमी
श्वरप्रियां॥ प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं॥ यइदं पठति स्तोत्रं श्र
णुयाद्वापि यो नरः॥ स मुक्तः सर्वपापेभ्यो मोदते दुर्गया सह॥ ॥ अथ महाष्ट
मी॥ सा परयुता॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्त
व्या कर्तव्या परसंयुता इति॥ ब्रह्मवैवर्तात्॥ मदनरत्ने स्मृतिसंग्रहे॥ वीरन्मता

८

ष्टमीप्रत्याख्यानवमीसंयुक्तासदा॥ सप्तमीसंयुतानित्यं शोकसंतापकारिणी॥ जंभेन
सप्तमीयुक्तापराजिताक्तु महाष्टमी॥ इंद्रेण निहतो जंभस्तस्माद्दानवपुंगव॥ त
स्मात्सर्वप्रयत्नेन सप्तमीसहिताष्टमी॥ वर्जनीया प्रयत्नेन मनुजैः शुभकांक्षि
भिः॥ सप्तमीशल्यसंयुक्ता मोहादज्ञानतोपि वा॥ महाष्टमी प्रकुर्वाणो नरकं प्रति
पद्यते॥ सप्तमीकलया यत्र परतश्चाष्टमी भवेत्॥ तेन शल्यमिदं प्रोक्तं पुत्रपौ
त्रक्षयप्रदं॥ तथा॥ पुत्रान्हंति पशून्हंति हंति राष्ट्रं सराजकं॥ हंति जातानजा
तांश्च सप्तमीसहिताष्टमी॥ तेन नात्र त्रिमुहूर्तवेधः॥ तदा घटिकामात्राप्यौ
दयिकी ग्राह्या॥ व्रतोपवासनियमे घटिकैकापि या भवेत्॥ इति देवलोक्तेः॥ गौ   म१छि॥
डाअप्येवमोक्तः॥ इयं भौमेति प्रशस्ता॥ अष्टम्यामुदिते सूर्ये दिनांते नवमी
भवेत्॥ कुजवारे भवेत्तत्र पूजनीया प्रयत्नतः इति मदनरत्ने वचनात्॥ सप्तमी

१०

स्वल्पसंविद्धा वर्जनीया सदाष्टमी॥ स्तोकापि सा महापुण्याय स्यां सूर्यो न्वेदि
तिमदनरत्नस्मृतिसमुच्चयवचनात्॥ अष्टमी नवमीयुक्ता नवमी चाष्टमी
युतेति पाद्मवचनाच्च॥ इयमेव मूलयुक्ता चेन्महानवमी संज्ञा॥ आश्वयुक्
शुक्लपक्षे याऽष्टम्यां मूलेन संयुता॥ सा महानवमी प्रोक्ता त्रैलोक्ये सुदुर्लभेति।
हेमाद्रौ स्कांदात्॥ मूलयुक्तापि सप्तमीयुता चेत्त्याज्यैवेत्युक्तं निर्णयामृते दु
र्गोत्सवे। मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः॥ लवमात्रेण सप्तम्या
अपि स्याद्यदि दूषितेति महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वा॥ अन्यथा प
रैवेति माधवमतं॥ एतच्च तुच्छत्वादुपेक्ष्यं युक्तं॥ सप्तम्यामुदिते सूर्ये परतो
ऽष्टमी भवेत्॥ तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनीति विश्वरूपनिबंध
वचनं तदाश्विन शुक्लाष्टमीविषयं॥ कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमी

दिने॥ नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैः॥ इति देवीपुराणे॥ तत्रापि पूजोक्ते

इति हेमाद्रौ निर्णयामृते चोक्तं। यानि तु भद्रायां भद्रकाल्याश्च मध्ये स्याद्दर्वेन क्रिया।

तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैरिति। यच्च मोहचूडोत्तरे ब्राह्मे च॥ आ

श्विनस्य सिताष्टम्यामर्धरात्रे तु पार्वती॥ भद्रकाली समुत्पन्ना पृथ्वीषाढा समायु

तेति॥ यच्च मदनरत्ने॥ महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी॥ सप्तम्यापि यु

तार्यीको मस्वेन तु विज्ञेषत इति तानि परदिने ष्टम्य भावविषयाणीति मदनरत्ने

उक्तं॥ यत्तु तत्रैव परदिने ष्टमी सत्वेपि पूर्वविद्धाविधायकवचनं॥ यदाष्टमी तु

संप्राप्य अस्तं याति दिवाकरः॥ तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरे हनि॥ दुर्मिं दिंतं

तज्ज्ञानीया नवम्या यत्र पूज्यते॥ तत्परदिने दशम्यां नवम्य भावविषयं॥ यदा

स्तर्योदये नस्या नवमी वापरे हनि॥ तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां न्वपेति

॥१७॥ ९

त्रैवस्मृतिसंग्रहोक्तेः॥ उत्तरास्ति यथोयत्रययं यांतिनराधिप॥ पूर्वोष्टमीतदाकुर्या
दन्यथात्वष्टमं भवेदिति दुर्गोत्सवे तु तिमदनरत्ने। वस्तुतस्त्विदं वचनं द्वय
मष्टमीनवम्योः स्तूयेदि यद्वयासं बंधपरं। अन्यथा पूर्वोक्तविरोधादिति दिक्॥ यु
तु। जतं भद्रां च भद्रा हन्ताव्योरतंर क्वचित्॥ सर्वसिद्धिप्रदा स्यामि भद्रायामर्चि
ताहमिति देवीपुराणं तद्विष्टिकरणमध्ये पूजाविधानार्थं॥ विष्टिं लब्ध्वा महाष्ट
म्यां मम पूजां करोति यः॥ तस्य पूजाफलं तस्या तेनाहमवमानितेति तत्रैवोक्ते
रिति निर्णयामृते। तथा कालिकापुराणे॥ सप्तम्यां पत्रिकापूजा अष्टम्यां वा पु
पोषणं॥ पूजा च जागरश्चैव नवम्यां विधिवद्बलि रिति॥ अष्टम्युपवासस्तु
पुत्रवता न कार्यः॥ उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्। यथा तथा वा पूजा
मात्रं ती दद्वे प्रपूजयेदिति तत्रैवोक्तेः॥ अविरोधाहमाद्यैर्निर्णयामृतत्वन्नविषयं।

१०७
३०

34

कन्यागतेसवितरिशुक्लपक्षेष्टमीयुता॥मूलनक्षत्रसंयुक्ता सामहानवमी
स्मृता॥नवम्यां पूजितादेवी ददात्यभिमतंफलं॥साशुभ्यासापवित्राच साध
न्यासुखदायिनी॥तस्यांसदापूजनीयाचामुंडामुंडमालिनी॥सदेतुके
नित्यतापि॥तस्यांयेच्छुपयुज्यंते प्राणिनोमहिषादयः॥सर्वेतस्वर्गतिंयांति
घ्नतोपापंनविद्यते॥यौवन्नबाल्ययज्ञात्रंपश्चस्तावन्नहन्यते॥नतथाब
लिदानेनपुष्पधूपविलेपनैः॥तसंतुष्यतेमेषमहिषैर्विंध्यवासिनी॥एवं
चविंध्यवासिन्यांनवरात्रोपवासतः॥एकभक्तेननक्तेन स्वशक्त्यायाचितेन
वा॥पूजनेयोजनेदेवीस्थानेस्थानेपुरेपुरे॥स्नातैःप्रमुदितैर्हृष्टैःब्राह्म ॥१७॥
णैःक्षत्रियैर्नृपैः॥वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः॥स्त्रीभिश्च
कुरुशार्दूलतद्विधानमिदंशृणु॥जयाभिकांक्षिन्नृपतिःप्रतिपत्प्रभृतिक्र

१०

35

मात्॥ लौहाभिसारिकं कर्म कारयेद्यावदष्टमीति॥ लौहाभिसारिकविधानं तत्रै
वोक्तं॥ प्रागुदक्प्रवणे देशे पताकाभिरलंकृतं मंडपं कारयेद्दिव्यं नव सप्तक
रं परं षोडषहस्तप्रमाणमित्यर्थः॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं॥
मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया॥ राजा चिन्हानि सर्वाणि शस्त्राण्य
स्त्राणि यानि च॥ आनीय मंडपे तानि सर्वाण्येवाधिवासयेत्॥ ततस्तु ब्राह्मणः स्ना
तः शुक्लांबरधरः शुचिः॥ ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतं॥ समस्त्रा
स्त्रमंत्रैर्होतव्यं पायसं घृतसंयुतं॥ हुतशेषं तुरंगाणां गजानां तु प्रदापये
त्॥ लौहाभिसारिकं कर्मैतन्मैव हारीभिः स्मृतं॥ एतत्प्रत्ययनान्न्वानगजा
श्व सम्यक् कृतां॥ ग्राम्ये नगरे नित्यं नंदिघोषपुरःसरं॥ प्रत्यहं नृपतिः स्ना
त्वा संपूज्य पितृदेवताः॥ पूजयेद्राजचिन्हानि फलमाल्यविलेपनैः॥ तत्र स्था

मिसरणाज्ञाज्ञो विजयः समुदाहृतः ॥ एतान्मंत्रान्प्रवक्ष्यामि पुराणोक्ता
न्हंतवा ॥ येः पराजिता प्रत्यक्षं तिकीर्तिमायुर्यशो बलं ॥ ॥ अथ मंत्राः ॥ छत्रस्य ॥
यथांबुदश्छादयती शिवायेमां वसुंधरां ॥ तथाच्छादय राजानं विजयारोग्य
वृद्धये ॥ चामरस्य ॥ शशांककरसंकाश क्षीरडिंडीरपांडुर । प्रोत्सारयाशु
दुरितं त्वामरामर दुर्लभं ॥ अथान्यस्य ॥ गंधर्वकुलजातस्त्वं मा भूयाः कुलदूष
कः । ब्राह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ प्रभावाच्च हुताशस्य वर्धयस्व तु
रंगमान्नौ तेजसा च वसुर्येयस्य मुनीनां तपसां तथा ॥ रुद्रस्य ब्रह्मचर्येण पवन
स्य बलेन च ॥ स्मर त्वं राजपुत्रस्त्वं कौस्तुभं च मणिं स्मर ॥ या गति ब्रह्महा गोघ्ने ॥ १९ ॥
मातृहा पितृहा तथा ॥ भूमिहा नृपवादी च क्षत्रियस्य पराङ्मुखः ॥ सूर्याचं
द्रमसौ वायुर्यावत्पश्यंति दुष्कृतं ॥ वज्राश्च ता गतिर्दिप्तं तद्वपो पंभ वेत्तवानि:

१

37

कृत्वोयदिवाक्षिप्तोयुद्धाध्वनितुरंगमा॥ रिपून्विजित्यसमरेसहभर्तासु
खीभवेति॥ अथध्वजस्य॥ शार्ङ्केतोमवीर्यस्यामवर्णाश्चयाम्यहं॥ पतिराजन
मस्तेस्तुतथानारायणध्वजो॥ कश्यपस्यारुणाश्चोतनोगरोविष्णुवाहनः॥ अप्रमेय
पुराधर्षेरणेदेवारिसूदन॥ गरुत्मान्मारुतगतिस्त्वपिसन्निहितोयतः॥ सारवं
त्यायुधान्यत्ररक्षत्वंचरिपून्दह॥ अथपताकायाः॥ हिरण्याक्षिपोर्युद्धे
युद्धेदेवासुरेतथा॥ काञ्चनेमिवधेयद्वद्धत्रिपुरघातने॥ शोभितासियथैवाद्य
शोभयास्मांश्चसंस्मर॥ पूतनारेवतीनाम्नाकालरात्रिश्चयास्मृता॥ दहत्वाशुरि
पून्सर्वान्पताकेत्वंमयार्चिता॥ अथगजस्य॥ कुमुदैरावणौपद्मः पुष्पदंतोथवा
मनः॥ सुप्रतीकोंजनोनीलएतेष्टौदेवयोनयः॥ तेषांपुत्राश्चपौत्राश्चवनान्यष्टौ
समाश्रिताः॥ मंदोभद्रोमृगश्चैवगजःसंकीर्णएवच॥ वनेवनेप्रसूताश्चयथा

९

38

निसुमहंतिच॥ पातु सो वसवो रुद्रा आदित्या समरुद्गणाः॥ भतीरं रक्ष नागेंद्र स्वा
मिवस्मतिपाल्यतां॥ आवाल्क्षहि जयं युद्धे गमने स्वस्ति नो व्रजेति। खड्गमंत्र॥ असी
वीसनखड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च॥
एतानि तव नामानि स्वयमुक्तानि वेधसा॥ नक्षत्रं कृत्तिका ते तु गुरुर्देवो म
हेश्वरः। रोहिणी यच्च शरीरं ते दैवतं च जनार्दनः॥ पिता पितामहो देवस्त्वं मां
पालय सर्वदा॥ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः॥ भावशुद्धो
मर्षणश्च अतितेजास्तथैव च॥ इयं येन धृता क्षोणि हतश्च महिषासुरः॥
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः॥ अथ छुरिकायाः॥ सर्वे
कुधानां प्रथमं निर्मितासि पिनाकिना॥ शूलायुधाद्विनिःकृष्य कृत्वा मु
ष्टिं ग्रहं शुभं॥ चंडिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणी॥ तथा विस्तारिता

॥२०॥

८

वासिदेवानां प्रतिपादिता ॥ सर्वे सत्वांगमृतासि सर्वेऽशुभनिबर्हिणी ॥ छुरिके
रक्षमां नित्यं शांतियच्छ नमोऽस्तुते ॥ अथ कटारपूजा ॥ रक्षांगानिगजात्रेऽहेर द
रक्षमां नित्यं शांतियच्छ नमोऽस्तुते ॥ कटारके मध्ये देशे क
वाजी घनानि च ॥ ममदेहं सदा रक्ष कटारक नमोऽस्तुते ॥ कटारकोमध्ये देशे क
हारी इति प्रसिद्धाः ॥ धनुःपूजा ॥ सर्वायुधमहामात्र सर्वदेवारिसूदन ॥ चाप
मां संमरेरक्ष शार्ङ्ग शार वैरिहा ॥ हृतं दुष्कलेनरक्षार्थं संहारायहरेण च ॥ त्रै
मूर्तिगतं देव धनुरत्नं नमाम्यहं ॥ कुंतपूजा ॥ प्राणापातेशयः राक्रस्त्वंमनया
नाकमायुध्या ॥ गृहाणजीवनं तेषां ममसैन्यं वरक्षतां ॥ वर्मपूजा ॥ कर्मप्रद स्त्वं सम
रे वर्मसैन्य यशोदेमे ॥ रक्षमां रक्षणीयाहं तापनेय नमोऽस्तुते ॥ अथ कनकेदंडम
त्रः ॥ प्रासारणाय दुष्टानां साधूसंरक्षणाय च ॥ ब्राह्मणानिर्मितश्चासि व्यवहार
प्रसिद्धये ॥ यशोदेहि सुखंदेहि जयदो भव भूपते ॥ ताडस्त्वरिभ्यत्रसर्वाञ्जहेम

२४

य

दंडनमोस्तुते॥ अडुंडुभीमंत्रः। डुंडुभेत्वं सपत्नानां घोरोहृदयवर्द्धनः॥ नवभ्रमी
पसैन्यानां तथाविजयवर्द्धनः। यजीमूतघोषेण प्रहृष्यंती च बर्हिणः। तथास्तुत
वशब्देन हर्षीस्मावं मुदीवहः। यथाजीमूतशब्देन स्त्रीणां त्रासोभिजायते॥ तथा
तत्रवशब्देन त्रस्यत्वं स्माद्विषारणः। अथशंखमंत्रः। पुण्यस्त्वं पुण्यशंखानांमं
गलानांमं गलं॥ विष्णुना विधृतोनित्यं अतः शांतिप्रदो भव॥ अथ सींहासन
मंत्रः॥ विजयो जयतोजेता रिपुघाती शुभंकरः। दुःखहा धर्मदः शांतः सर्वारि
ष्टविनाशनः॥ एतैर्वसंनिषोयस्मात्त्वसींहामहाबल॥ तेनासिंहासनेनित्यं
वदेमंत्रैः स्वगीयते॥ त्वयिस्थितः शिवः शांतस्त्वयिशक्रः सुरेश्वरः। नमस्ते सर्वतो ॥२१॥
भद्रः भद्रदो भवभूपतेः॥ त्वौत्रैलोक्यजयस्सर्वस्य सिंहासननमोस्तुते॥ तथैवक्ता
कर्मविन्हानिस्वानिष्टज्यानि शिल्पिभिः॥ लोहाभिसारिकं कर्मकर्त्त्वं वैमंत्रपूर्वकं॥

१०

नियमं कृत्वा तथा षष्ठ्यां पत्रीके स्नानमाचरेत्॥ कुंकुमचंदनैश्चंपकचतुःशमैः शै
लपुत्रीं ष्टुवर्चितगात्रीं देवीं कुसुमैरभ्यर्चयेद्बुद्धिमान्॥ कुसुमैः सपद्मपुष्पसदी
पधूपैः सनैवेद्यैर्मासैर्बलिपहारैर्मंगलशब्दैः समुच्छलितैः॥ विहीनं तच्छ्रेयो नैं
स्यंदनशीशास्त्रधारिजनलोके॥ कुष्टैपञ्चरत्नादिकं निवेद्यते सर्वमेव भगवत्यै
दुर्गा साप्रजनीया चतद्दिनेंद्राण पुष्पकैः॥ सा च मान्या सुरशान्याः तस्याः रूढ व्रते
षष्ठ्यां ततः ततः खड्गं नमस्कृत्य शाणं वध सिद्धये इच्छेत द्विजः परं राज्यं सुमिदं वात्म
नेन्द्रपः॥ पुनः पुनः प्रणाम्या यां संस्मरेद्धृदये शिवां॥ सर्वे कृत्वेति कौरव्य सप्तम्यां
जातरं निशि॥ नटनर्तकैर्गीतैश्चकारयेच्च महोत्सवं॥ एवं हृष्टेर्निशां नीत्वा प्रभा
ते अरुणोदये॥ घातयेन्महिषान्मेषान्नगुप्ते नर्तकं वरान्॥ शतमर्धं शतं वा
पि तद्वै वा यथेच्छया॥ सुराः सर्वेन्तेः कुंभैस्तर्पयेत्परमेश्वरीं॥ कपालिके न्य

८

स्तद्देयंदासीदासनेतथा॥ ततोपरान्हसमयेनवम्यांवैरयेस्थितान्॥ भवानीन्नाम
यज्ञार्द्धस्वयंराजासराद्धवान्॥ कश्चिचोपापितोवीरोविद्धतोन्येनखड्गवान्॥ भद्र
तस्यरक्तबलिंदद्यान्मंत्रेणानेनसाम्यिषं॥ सरक्तंसजलंचान्नंगंधपुष्पाद्य
तैर्युतान्॥ त्रिस्त्रीवारान्सम्भ्रमलेनदिक्षुरेबलिं॥ मंत्रश्च॥ बलिंगृह्णंत्विमं
देवाआदित्यावसवस्तथा॥ मरुतश्चाश्विनौरुद्राः सुपर्णाः पन्नगाःखगाः॥ अ
सुरायातुधानाश्चपिशाचोरगराक्षसाः॥ डाकिन्योयक्षवेतालायोगिन्यः
पूतनाः शिवाः॥ जंभकाः सिद्धगंधर्वामालाविद्याधरानगाः॥ दिक्पालालोक
पालाश्चयेचविघ्नविनायकाः॥ जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षि
यः॥ माविघ्नंमाचमेपापंमासंतुपरिपंथिनः॥ सौम्याभवंतुतृप्ताश्चभूत
प्रेताःसुखावहाः॥ इति॥ इतिमहाष्टमी॥ महानवमीदर्शयुताग्राह्या॥ प्र

॥२२॥

वोक्तवचनात्॥ नवमी दुर्गाव्रते श्रावणीति दीपिकोक्तेः॥ श्रावणी दुर्गनवमी दूर्वा
चैव हुताशनी॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेश्च॥
भविष्येपि॥ अश्वयुक् शुक्लपक्षे तु अष्टमी मूलसंयुता॥ सा महानवमी नाम त्रैलो
क्येपि सुदुर्लभेति॥ मूलस्तु पूर्वदिने॥ दुर्गापूजा सु नवमी मूलर्क्षे तत्रयान्विता॥
महती कीर्तिता तस्यां दुर्गा महिषमर्दिनीति मदनरत्ने लैङ्गात्॥ अत्र पूजायां दिनद्वये
पि व्याप्तौ पूर्वैव॥ एकदेशव्याप्तौ तु संगवस्पर्शिन्येव॥ अष्टम्यन्ते तु नवमीपूजा
पि सूर्योदय एव सः॥ सायं तु त्रिमुहूर्ता पर्वा॥ तदुक्तं दीपिकायां॥ त्रिमुहूर्तेगा तु सक
ला ग्राह्येति॥ माधवोपि॥ सायं तूत्तरयात इन्नूनयाऽनविध्यत इतीति त्रिमुहूर्त
योगे पूर्वा नवमी॥ पूर्वोक्तवचनात्॥ न कुर्यान्नवमीं तात दशम्या तु कदाचनेति स्कां
दे पराणि षेधाच्च॥ त्रिमुहूर्तयोगाभावे तु निषिद्धापि परैव कार्येति निष्कर्षः॥ यत्तु॥ नव

१०

44

म्यां च जपं होमं समाप्य श्रवणे पिबेवेति संग्रहोक्तेः। व्रतं च जागरश्चैव नवम्यां
विविधं बलिरिति देवीपुराणाच्च॥ नवम्यां होमबल्यादि विहितं तत्राश्वयुक्शु
क्लनवमी मुहूर्तं वा कला यदि सा तिथिः। सकला ज्ञेया लक्ष्मीविद्याजयार्थिभि
रिति सौरपुराणात्॥ सूर्योदये परं रिक्ता पूर्णास्योदपरा यदि। बलिदानं प्र
कर्तव्यं तत्र देशे शुभावहे॥ बलिदाने कृतेष्टम्यां पुत्रभंगो भवेदिति देवी
पुराणाच्च॥ बल्यादौ परा कार्या॥ उपवासादौ तु पूर्वेति मदनरत्ने उक्तं॥ प्र
तापमार्तण्डेप्येवं॥ निर्णयदीपे तु महानवमी परदिने पराह्णव्यापिनी चेत्परा॥
अन्यथा पूर्वा॥ आवर्तनात्पूर्वकाले नवमी स्यात्परेऽहनि। दुर्गार्चा तत्र प्र
विद्धः पूर्वोक्तत्वष्टमीयदीति बौधायनवचनादित्युक्तं॥ अस्यास्तु शारदाम
र्म्मो विषयत्वं सम्यक्त्वं च विमृश्यं॥ यानि तु॥ नंदायां ज्वलते वह्निः पूर्णा

॥२२॥

४००२

यं पशुघातनं ॥ भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यतीति नवम्यां मपरा
न्हे तु बलिदानं प्रशस्यते ॥ दशमी वर्जयेत्तत्र नात्र कार्या विचारणेति । नंदाया
दर्शने रक्षा बलिदाने दशासु च ॥ भद्रायां गोकुलक्रीडा देशनाशाय जाय
ते ॥ इति ब्रह्मवैवर्तनारदादिवचनानि स्फुटा वीक्षितानि षष्ठ्यपराणीति मदन
रत्ने । तथा कालिकापुराणे । नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि: जपहोमं
च विधिवत्कुर्यात्तत्र विभूतये ॥ केचित्तु अष्टम्यां होमं कुर्वंति । रुद्रयामलेपि वि
कल्प उक्तः ॥ तत्तु निर्मूलं ॥ दुर्गाभक्तितरंगिण्यादि गौडग्रंथेषु चापि नवम्यां होम उ
क्तः ॥ होमे च विशेष उक्तो डामरतंत्रे ॥ पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितं ॥
होमयेद्विधिवद्भक्त्या दशांशेन जपोत्तमम् ॥ रुद्रा ध्यायेय यो होममंत्रेणैकेन साधये
त् ॥ तथा सप्तशत्यां जपहोमः श्लोकेनैकेन साधयेत् ॥ यद्वा सप्तसती जपहोममंत्रो नवार्णः ॥

ऐं ह्रीं क्लीं चामुंडायै विच्चे इति नवाक्षर इति केचित्॥ पूजोक्तो ग्राह्य इति तु युक्तं। रु
द्रयामलेपि। प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा॥ किंशुकैः सर्षपैः गोली
जा दूर्वांकुरैरपि॥ यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा॥ रक्तचंदनखं
डैश्च गुग्गुलैश्च मनोहरैः॥ प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात्॥ नवा
क्षरेण वा हुत्वा न मोदव्या इतीति चेति॥ रहस्ये तु प्रतिश्लोकं च जुहुयात्पायसं ति
लसर्पिषा इत्युक्तं। दुर्गाभक्तितरंगिण्यां तु तिलैर्जुहुयात् इति मंत्रेण च होम उक्तः। अ
थ बलिदाने॥ तत्रश्च मेषच्छागमहीषस्वमांसानौ द्रुतरा तत्र प्राशस्त्यफलविशे
षश्चोच्यतो वसेय इति दिक्। बलिप्रकारस्तु देवीपुराणे कन्यासंस्कारवौशेके
धु कृष्णाष्टम्यां परराज्यवा॥ द्रोणपुष्पैश्च बिल्वाम्र जातीपुन्नागचंपकैः॥ पंचाद्वल ॥२४॥
क्षणोपेतं गंधपुष्पसमन्वितं॥ विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत्॥

47

ॐ कालि कालि यज्ञेश्वरी लोहदंडायै नमः इति मंत्रः॥ तदुत्थरुधिरं सम्यग्गृहीत्वा पू
जनादिषु॥ आदिशब्दाच्चरकी चीदारी पापरा दासः निरुतेभ्यः प्रतेदा व्यं महाकौशि
कमंत्रितं॥ मंत्रस्तत्र वक्ष्यते॥ तया॥ तस्या यतोन्य पस्त्राया कृत्वा गात्रं तु पेष्टिकं॥ खड्गे
न घातइत्वा तु दद्यात्स्कंदविशाखयोः॥ अशक्तौ ब्राह्मणेन च कूष्मांडादिभि र्ब
लिदानं कार्यं॥ तदुक्तं कालिकापुराणे॥ कुष्मांडमिक्षुदंडं च मांसं सारसमेव च॥
एते बलिसमाः प्रोक्ताः स्तृप्तौ छागसमाः सदा॥ रुद्रयामलेपि॥ छागाभावे तु कू
ष्मांडं श्रीफलं वा मनोहरं॥ वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना॥ तथा॥
ब्राह्मणेन सदा देयं कूष्मांडं बलिकर्मणि॥ श्रीफलं वा सुरां वीरा छेदं नैव तु
कारयेत्॥ छेदविकल्पः॥ माषान्नेन बलिं दद्याद्ब्राह्मणो न विजानता॥ कालिका
पुराणे॥ उत्तरादिस्वो सुमुखो भूत्वा बलि पूर्वमुखं तथा॥ निरीक्ष्य साधकः पश्चादिमं मं

त्रमुदीरयेत॥ पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः॥ प्रणमामि ततः सर्वरूपिणं
बलिरूपिणं॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशने॥ चामुंडा बलिरूपाय बलेस्तु
भ्यं नमोस्तु ते॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा॥ अतस्त्वां घातयाम्यद्य त
स्माद्यज्ञे वधो वधः॥ ऐं ह्रीं श्रीं इति मंत्रेण बलिमस्त्ररूपिणं॥ चिंतयित्वान्यसेत्पुष्पं
मूर्ध्नि तस्य तु भैरवं॥ रसना त्वं चंडिकायाः सुरलोकप्रसाधकेः॥ ह्रीं ह्रीं खड्ग इति मं
त्रेण ध्यात्वा खड्गं च पूजयेत्॥ पूजयित्वा ततः खड्गं आं ह्रूं फडिति मंत्रकेः॥ २ ह्रीं।
चाविमलं खड्गं छेदयेद्बलिमुत्तमं॥ ॐ ह्रीं ऐं ह्रीं कौशिकीति रुधिरेणाप्यायता॥
मिति॥ बलिदाने तु दुर्गायाः सर्वत्रायं विधिः स्मृतः॥ अथात्र प्रसंगात् चंडीविधा ॥२५॥
नमुच्यते॥ रुद्रयामले॥ अथ चंडीविधानं च प्रोच्यमानं शृणु प्रियतमा॥ सर्वोपद्रवना
शार्थं अथ चंडीं समारभेत्॥ षोडशास्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं॥ वसुकोणयुतं

२२

वेदीमध्ये कुर्यात्त्रिभागतः। पञ्चैकवितां रम्यां मुक्तायेद्धस्तसंमितां। पञ्चवर्णरजोभि
श्च कुर्यान्मंडलकं शुभं। पंचवर्णवितानं च किंकिणीजालमंडितं। आचार्येण समं वि
प्रान् वरयेद्दश सुव्रतान्॥ ईशान्यां स्थापयेत्कुंभं पूर्वोक्तविधिना हरेत्। वारुण्यां च प्र
कर्तव्यं कुंडलक्षणलक्षितं॥ प्रतिदिव्या प्रकुर्वीत सुवर्णस्य पलेन वै। तदर्धेन
तदर्धेन तदर्द्धेन महामते॥ अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि॥ पट्टकू
लयुगच्छिन्नां वेदिमध्ये निवापयेत्॥ देवीसंपूज्य विधिवज्जपं कुर्युर्द्विजोः
शतमादौ शतं चांते जपेन्मंत्रं नवार्णकं। चंडीसप्तशतीमध्ये संपुटोयमुदाहृतः॥
एवं हि त्रीणि चत्वारि जपेद्दिनचतुष्टयं। रूपाणि कमशास्तद्दर्शनादीकमाचरेत्॥
पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः। गुडूचीपायसद्दूर्वा तिलान्सक्षौद्राज्यं वा
नपि॥ चंडीपाठस्य होमं तु प्रतिश्लोकं दशांशतः। होमं कुर्याद्ग्रहादिभ्यः समिदाज्यैर्व

१०

१०

50

स्त्व क्रमात॥ कृत्वापर्णी कृतिं दद्याद्विप्रेभ्यो दक्षिणा क्रमात॥ कपिलां गां नीलमणीं श्वे
ताश्वं छत्रचामरे॥ अभिषेकं ततः कुर्याद्यजमानस्य ऋत्विजः॥ एवं कृते मुरखानस
र्वसिद्धिः प्रजायत इति॥ अथ सहस्रचंडी॥ साप्तवत त्रैवा क्रमा॥ सहस्रचंडी विधिवत्
श्रृणु विघ्नोपशामहामते राज्यभ्रंशे महोत्पाते जनमारे महाभये॥ गजमारे श्वमारे
च परचक्रभयेतथा॥ इत्यादिविविधदुःखदोषरोगादिजे भये॥ सहस्रचंडिकापा
ठं कुर्याद्वाकारयेत्तथा॥ जापकान्सहस्रातं प्रोक्ता विंशद्धस्त स्वमंडपः॥ मोज्याः सहस्रं
विप्रं द्वागो शतं दक्षिणादिशतानि रवैद्विगुणं देयं शय्यादानं तथैव च॥ सप्त वा नयं
च भूदानं श्वेताश्वं च मनोहरं॥ एवं च निष्क्रमिता मूर्तिः कर्तव्या वा यथेमानतः॥ अष्टा ॥२८॥
दशभुजा देवी सर्वायुधविभूषिता॥ अवारितान्नं दातव्यं सहस्रं प्रत्यहं विभो॥
शतं वा नीयता हारः पयः पापन्न वर्धयेत्॥ एवं य चंडिकापाठं सहस्रं तु समाचरे ॥

१०

२५

51

तस्यस्यात्कार्यसिद्धिस्तेन नात्र कार्यविचारणेति। एतद्वयंयद्यपिमहानिबंधेषु ना
स्तितथापिप्रवरदृष्टत्वादुक्तमितिदिक्॥ इतिशतचंडीसहस्रचंडीविधिः। अथन
वरात्रपारणाविधिःनिर्णयः॥ साच दशम्यां कार्या॥ आश्विनेमासिशुक्लेतु कर्त
व्यंनवरात्रकं। प्रतिपत्क्रमेणैवयावच्चनवमीभवेत्। त्रिरात्रंवापिकर्तव्यंस
प्तम्यादियथाक्रममिति हेमाद्रौभविष्यवचनात्। नवमीतिथिपर्यंतंवृद्ध्यापूजा
जपादिकमिति। प्रागुक्तवचनेननवमीपर्यंतंप्रधानभूतपूजाव्यक्तेरुपवासादेश्चां
गत्वेनत्रिरात्रत्वंविस्फुरादीतयाप्रसक्तेः। नचात्रोपवासेसमानाभावइतिवाच्यं। ए
वंचविंध्यवासिन्यांनवरात्रोपवासतः। एकभक्तेननक्तेनतथैवायाचिते
नवा। पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे॥ इतिहेमाद्रौभविष्योक्तेः। नवरा
त्रसमाख्यातेनवम्यामप्युपोषणाच्च। नतुतिथिह्रासेऽष्टावप्युपवासाभवंतीतिकथं

१०

52

समाख्यातेन कर्मविशेषेण नवरात्ररात्रशब्दो रूढः। अथ पौरुषं देवीपुराणे। तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम्। इति केचित्। तिथिह्रासेपि न तिथ्यो न्यूनत्वं
पोषयित्वा नवरात्रत्वात्। ततः एतेन रात्रिणां पर्वान्यात्। ह्रासे अमामादाय न
त्वमेति मैथिलोक्तिः परास्ता। यत्तु देवीपुराणे। कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नं
दिकां। अयाचितैकभक्तेन नक्ताशी त्र्यहवानपि। प्रतिपत्प्रभृति क्रमात्। लौकिकानि सारिवं
कर्मकारयेद्यावदष्टमी। तिथिविषये अष्टमीपर्यंतमेवोक्तेः। यदपि निर्णयदीपे। आ
श्विने शुक्लपक्षे तु नवरात्रमुपोषितः। नवम्यां पारणं कुर्याद्दशमीमिश्रितान
वेत्। दशमीमिश्रितायां तु पारणे नवमी भवेत्। दुःखदारिद्र्यदा ज्ञेया तथा
व्रतविनाशिनीति। ब्राह्मनाम्ना लिखितं वचनं। यच्च रुद्रयामले इति वदंति
अष्टम्यासह कार्यास्यान्नवमीपारणादिने। यो मोहाद्दशमीवेधे नवम्यां वंडि

॥२७॥

९

कां यजेत्॥ पारणं च प्रकुर्वीत तस्य पुण्यं निरर्थकं॥ नवम्यां पारिता देवी कुलवृद्धिं प्रय
च्छति॥ दशम्यां पारिता देवी कुलनाशं करोति वै॥ तस्मात्तु पारणं कुर्यान्नवम्यां विबु
धाधिपेत्यादीनि तानि युद्धिसमूलानि तदा लोहाभिसारिकविषयाणि तस्याष्टमी
पर्यंतमेवोक्तेरित्युक्तमेवोक्तेरिति प्रांचः॥ अन्यथा महाष्टम्यां परविद्धायां पारणवि
धाने पूर्वनिबंधविरोधो बहुवीरस्यात्॥ यानि तु केश्चिल्लिखितानि नवम्यां पारणा
विधायकवचनानि तानि हेमाद्र्यादिविरुद्धत्वान्निर्मूलानि सकलेप्ययदादिनद
ये नवमी तदा द्वितीयदिने ऽपोष्य तिथ्यंते पारणा नोक्तिं तु नवमीमध्ये कार्यं यथैवं
यानि शिवरात्रिपारणावत्॥ अत्र केचित् पारणाहे सूतकादिप्राप्तौ तदति कम्य पा
रणं कुर्यादित्याहुः॥ तेनेदं काम्योपवासे प्रक्रांते त्वंतरा सूतकस्तके॥ तत्र काम्यव्रतं
कुर्याद्दानार्चनविवर्जितमिति माधवीये कौर्मोक्तेः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेर्च

नजपे। प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च। आशौचमध्येपित
त्कर्तव्यतावगतः। पारणां तच्चाद्भुतस्य। प्रारंभ स्कतेनैवोक्तः। प्रारंभो वरणां यज्ञे संकल्पो
व्रतसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति। रुद्रयामलेपि। सूतके पार
णं कुर्याच्च वम्यां होमपूर्वकं। तद्दते भोजनं द्विपाच्च दानं दद्याच्च शक्तितः इति। तद्दते सू
तकांते। एवं च्चाभिरपि रजोदर्शने मध्ये कर्तव्यमेव पारणां। संप्रवृत्तेपि रजसी न त्याज्यं
द्वादशी व्रतमिति माधवीये ऋष्यशृंग वचनात्। द्वादशी व्रतमित्युपलक्षणं। प्रारब्ध
दीर्घतपसां नारीणां यद्रजो भवेत्। न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति तत्रैव स
त्यव्रतवचनाच्च। किंच। एकादश्यादौ पंचगव्याशौचपाते मासोते पारणायतः। मासो
पवासांते पंचशाशौचपाते जीवनासंभवाश्चायत्तु नियमस्त्यायदा नारी प्रवद्यते तदंतरा
रजः। उपोष्य वत्तुतां रात्रौ स्नात्वा वा शेषं चरेद्व्रतमित्यंगिरोवचनं। यच्च हारीतवचनं
नीयमस्थो व्रतस्थो स्त्री रजः प्रत्ययेत्कथं चन। त्रिरात्रं तु द्विपञ्चं प्रेत शेषं समापयेदिति।

।।२८।।
५००
२

तद्विधवोपासविषयं। तासां तत्र निषेधादिति चेन्न वयं तु प्रागुक्तसप्तव्रतवचने दीर्घ
तपसामिति विशेषणोपादानाद्द्वादशीव्यतिरिक्तसकलैकाहोपवासविषयं यन्निषेधः
त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु तन्मध्ये पुनः पारणेति ब्रूमः। अत्रैवं मध्ये तु सर्वापि
पारणा भवति प्रागुक्तकौर्मवचनादिति सिद्धं। अयं चोपवासपारणानिर्णयः सर्वव्रते
षु बोद्धव्य इत्यलं भूयसा॥ दशम्यां देवीं विसर्जयेत्। तदुक्तं रुद्रभक्तितरंगिण्यां दे
वीपुराणे। ततः प्रातः प्रपूजयित्वा दशम्यां विधिपूर्वकं। संप्रेषणं तु कर्तव्यं गीतवादित्रनि
स्वनैः। रूपं देहि यशो देहि भगं भगवति देहि मे। पुत्रान् देहि धनं देहि सर्वान् कामांश्च दे
हि मे। महिषघ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमो
स्तु ते। इति संप्रार्थ्य देवीं तु तदुत्थापयेद्बुधः। उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य
चाकुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह। गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके॥

दुर्गा ५

९२

56

व्रजस्त्रोता जलं वृथ्यैस्थियतां बजलेत्विहेति उत्थाप्य जलेनीत्वा॥ दुर्गे देवि जग
न्मातः स्वस्थानं गच्छ पूजिता। संवत्सरे व्यतीते तु पुनरागमनाय वै॥ इमां पूजां म
या देवि यथाशक्त्योपपादिताम्। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तममिति ज
ले प्रवाहयेत्॥ इयमेव विजयादशमी॥ सा च द्वितीयदिने श्रवणायोगाभावे पूर्वा ग्रा
ह्या॥ तदुक्तं हेमाद्रौ स्कांदे। दशम्यां तु नरैः सम्यक् पूजनीयापराजिता। ऐशानीं
दिशमाश्रित्य अपराह्णे प्रयत्नतः॥ या पूर्णा नवमीयुक्ता तस्यां पूज्यापराजिता॥
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः। नवमीशेषयुक्तायां दशम्यामपरा ॥२९॥
जिता। ददाति विजयं देवी पूजिता जयवर्धिनी॥ तथा॥ आश्विने शुक्लपक्षे तु दश
म्यां पूजयेन्नरः। एकादश्यां न कुर्वीत पूजनं चापराजितमिति। यदा तु पूर्वदि
ने श्रवणयोगाभावः परदिने चाल्पापि तद्योगिनी तदा परैव तथा च हेमाद्रौ ब्र

१०

57

तत्कांडे कश्यपः। उदये दशमी किंचित्संपूर्णैकादशी यदि। श्रवणर्क्षे यदा काले सा
तिथिर्विजयाभिधा। श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः। उल्लंघयेयुः सी
मानं तद्दिनर्क्षे ततो नरा इति। काल पराह्णे। ज्योतिर्निबंधे रत्नकोशे च नारदः। ई
षत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः। विजयो नाम कालोऽयं सर्वकार्यार्थसि
द्धिदः। इषस्य दशमी शुक्ला पूर्वविद्धा न कारयेत्। श्रवणेनापि संयुक्ता राज्ञां
पट्टाभिषेचनं॥ सूर्योदये यदा राजन् दृश्यते दशमी तिथिः। आश्विने मासि
शुक्ले तु विजयां तां विदुर्बुधाः। अत्रायं निर्गलितार्थः। अपराह्णस्थैव्यः कर्म
कालः। तत्रैव पूजाद्युक्तेः। प्रदोषो गौणः। तद्दिनद्वये अपराह्णव्यापित्वे सर्वाप्रदोष
व्याप्तेराधिक्यात्। दिनद्वये प्रदोषव्यापित्वे परा। अपराह्णव्याप्तेराधिक्यात्। श्रवणा
स्तारोहिणीवत्प्रयोजकः। दिनद्वये पराह्णस्पर्शात्तु पूर्वा। तत्रापि परदिने पराह्णे अ

वणासंत्वेपरैवेतिदिक्॥ अत्रविशेषोभार्गवत्वेन दीपिकायांभविष्ये। शमीयुक्तंज
गन्नाथंभक्त्यानाममनेयंकरं॥ अर्चयित्वाशमीं द्रोणमर्चयेच्चततःपुनः। शमीमंत्र
स्तुहेमाद्रौगोपथब्राह्मणे। अमंगलानांशमनींशमनींदुष्कृतस्यच। दुःस्वप्न
नाशिनींधन्यांप्रपद्येहंशमींशुभामिति। तथाभविष्ये। शमीशमयतेपापंशमीलो
हितकंटकी॥ धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी। करिष्यमाणयात्राया
यथाकालंसुखंमया॥ तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजितेति। तथा॥ सार्द्रां
तांगृहीत्वामाद्रौ शमीमूलगतांमृदं। गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति।
ततोभूषणवस्त्रादिधारयेत्स्वजनैःसहेति। अत्रबलिनीराजनमुक्तंकृत्यरत्ने। ॥२०॥
तत्रमंत्रः। चतुरंगबलंमह्यंनिररिष्टंव्रजत्विह॥ सर्वत्रविजयोमेस्तुत्वत्प्रसा
दात्सुरेश्वरीति॥ अथआश्विनपौर्णमासीपराग्राह्या। सावित्रीव्रतमत्रएवभवतो

२०

मापौर्णमास्योः परेति दीपिकोक्तेः। अत्रैव विशेषस्तिथितत्त्वे लैङ्गे। आश्विने पौर्णमा-
स्यां तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्या लोकविभूतये॥ कौमु-
द्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम्। सुगन्धिर्निशि सद्वेषो अक्षैर्जागरणं चरेत्॥
तथा। निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी। तस्यै वित्तं प्रयच्छामि अक्षैः क्रीडां करो-
ति यः। अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन। आश्वयुज्यामाश्वयुजीकर्मे-
ति। तत्र पूर्वाह्णव्यापिनी ग्राह्या देवकर्मत्वात्। आग्रयणं तु पर्वणि कार्यं। आग्रयणाग्र-
हणं नाम पर्वणी स्यात्तदुच्यत इति शौनकोक्तेः। तन्नापि विशेषवचनात्कार्यमिति प्राञ्चः।
तच्च दर्शेष्ट्याः परं पौर्णमासेष्ट्याश्च प्राग्भवतीति दर्शेष्ट्याः परस्तु तमाग्रयणं कं प्राङ्-
पौर्णमासाच्चतदिति दीपिकोक्तेः। तच्चाग्रयणं त्रेधा। व्रीह्याग्रहणं यवाग्रहणं श्यामा-
काग्रहणं चेति। एषां कालस्मृतौ गर्गः। व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत् श्यामा-

कैर्निर्वापैर्वैषाम्वापकाले नान्येन पुराणैश्चेति। आपस्तंबोपि। वर्षासु श्यामाकैर्यजेत
शरदि व्रीहिभिर्वसंते यवैर्यथर्तु वेणुयवैरिति। तत्रापि श्यामाकाग्रहायणमनित्य
मितरस्तु अनाहिताग्नेर्नित्यं। यवाग्रहणं च कार्यमिति स्मार्तेष्टेस्त्ररयुक्तत्वात्। स्वै
व्रीहियवदेवतासंबंधानामेवमंत्राणामाम्नानाञ्च। आहिताग्नेस्तु यवाग्रहणं स्या
यनित्यत्वं। अपि वा क्रियायवेष्विति सूत्रात्। यद्वा व्रीह्याग्रयणेन समानतंत्रता।
श्यामाकैस्तु प्रस्तरं कुर्यान्नाग्रयणं। यदि वा तदपि समातंत्रमिच्छादि नारायण
वृत्तौ परिश्रमवतां सुलभमित्यलं॥ इदं च वर्षाभावे देवनंदात्रे वृत्तिकादिवि
वारवाकीतो। कार्यमिति स्मृत्यर्थसारे उक्तं। बौधायनीयकेशवस्वामिना प्यु
क्तं। यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदैव कालत्वादाश्वयुजीकर्म
णा स्य च समानतंत्रता भवति। तदेतद्वृत्तिकृता एव बहिरिष्याज्येति सूत्रे स्पष्ट

॥३१॥

मुक्तं। अस्याकरणे प्रायश्चित्तमुक्तं स्मृतिचंद्रिकायां कात्यायनेन॥ नित्ययज्ञापये
वैव वैश्वदेव द्वयस्य च॥ अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा॥ भोजने पति
तान्नस्य चरो वैश्वानरो भवेत्॥ कारिकापि। अकृताग्रयणो श्रीपात्रवान्नं यदि
वैनरः। वैश्वानराय कर्तव्यो चरुः प्रणीङ्कृतिस्तु वेति। रुग्ग्विधाने तु। सोमिद्दशामा
यामंत्रं च वर्षे वर्षे जलेच्छता। आग्रयणं यदाच्छन्नं तस्मिन्नेतादृशुक्तं। पतत्वा
यदि मलमासे कार्यमन्यथा नेति प्रागुक्तं। अन्यो न्याहिताग्न्यादि विशेषः शौनका
देज्ञेय इत्यलं भूयसा॥ ॥ इति श्रीमद्भट्टकमलाकरकृते निर्णयसिंधौ आश्वि
नः॥ अथ कार्तिकः॥ ॥ तुलासंक्रमे पागपरा दश घटिकाः पुण्याः। रात्रौ तु प्रागुक्तं।
अथ कार्तिकस्नानं॥ तत्र पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः। कुंभे मकर मेष
स्तु प्रातःस्नानं विधीयते॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति। सौरमासे

उक्तः। प्राच्यां श्वेतदेवाद्रियेतां दाक्षिणात्यास्तु। आश्विनस्य तु मासस्य या शुक्लै
कादशी भवेत्। कार्तिकस्य व्रतानीतस्यां वै प्रारभेत्सुधीरिति पाद्मोक्तेः। भार्गवार्च
ने च प्रारभ्यैकादश्यां शुक्लायामाश्विनस्य तु मानवः। प्रातःस्नानं प्रकुर्वीत यावत्कार्
तिकभास्कर इति विष्णुरहस्योक्तेर्हेमाद्रौ वादित्यपुराणे। पूर्णे आश्वयुजे मा
सि पौर्णमास्यां समाहित इत्युक्तो मासः समग्रं परया भक्त्या समाप्यते कार्ति
कपौर्णमास्यामित्यतोभिधानाच्चाश्विनशुक्लैकादश्यां पौर्णमास्यां वा समाप
येदित्योक्तः। मदनपारिजाते विष्णुः। कार्तिकं सकलं मासं नित्यस्नायी जितेंद्रि
यः। जपन्हविष्यभुक्छांतः सर्वपापैः प्रमुच्यते। अदेत्र देशविशेषः पाद्मे। कार्ति ॥३२॥
कं प्रक्रम्य। कुरुक्षेत्रे कोटिगुणं गंगायामपि तत्समम्॥ ततोधिकं पुष्करस्यां
द्वारवत्यां च भार्गव॥ पुण्याः पर्युश्चसप्तैवस्तुनयां मथुराधिका॥ इति लैमः। कार्तिको

विप्रा मथुरायां च ग्रामिह ॥ यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छतीति ॥ इदं च स्ना
नं कार्त्तिकेऽस्थि पंचनदेप्यति प्रशस्तं ॥ शतं समाते पत्तता कृते यस्माप्यते फलं ॥ तत्का
र्त्तिके पंचनदे सकृत्स्नानेन लभ्यते ॥ कार्त्तिके बिंदुतीर्थे यो ब्रह्मचर्यपरायणः
स्नास्यत्यनुदिते भानौ भानुजात्तस्य भिःकृत इत्यादि काशीखंडोक्तेः ॥ भानु
जोऽयम् ॥ स्नानमंत्रश्च तत्रैव ॥ कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं
तव देवेश दामोदर मया सह ॥ इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती नर इति ॥ अ
र्घ्यमंत्रोपि तत्रैव ॥ व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया
दत्तं दनुजेंद्र निषूदन ॥ नित्ये नैमित्तिके कृत्स्ने कार्त्तिके पापनाशने ॥ गृहाणार्घ्यं म
या दत्तं राधया सहितो हरे ॥ इमौ मंत्रौ समुच्चार्य योऽर्घ्यमस्मै प्रयच्छति ॥ सुवर्णरत्न
पुष्पाढ्यं पुण्यशंखेन पुण्यवान् ॥ सुवर्णरत्नपृथ्वी तेन दत्ता न संशय इति ॥ एवं सं

१०

64

पर्णीस्नानाशक्तो ह्यहं स्नायात्। वाराणस्यां पंचनदे ह्यहं स्नानास्तकार्तिके। अभि
तेषु एयव पुषःपु एयनाज्ञोतिनिर्मला इति॥ काशीखंडोक्तेः। अथ मालाधारणं॥
तत्र स्कांदे द्वारकामहात्म्ये॥ निवेद्य केशवे मालां तुलसीकाष्ठसंयुतां। वहते यो
नरो भक्त्या तस्य नैवास्ति पातकं। न जह्यात्तुलसीमालां धात्रीमालां विशेषतः॥
महापातकसंहर्ति धर्मकामार्थदायिनी॥ विष्णुधर्मे॥ स्पृष्ट्वा तु यानि लोमानि धा
त्रीमाल्कां ककौन्तराणां॥ तावद्वर्षसहस्राणि वैकुंठे वसति ध्रुवं॥ मालायुग्मं
तुयो नित्यं धात्रीतुलसिसंभवं॥ वहते कंठदेशे तु कल्पकोटि दिवि वसेत्॥ तु
लसीकाष्ठसंभूते माले कृष्णजनप्रिये॥ बिभर्मि त्वामहं कंठे कुरु मां कृष्ण
वल्लभं॥ एवं संप्राप्य विधिवन्मालां कृष्णगलेर्पितां। धारयेत्कार्तिके यो
वै स गच्छेद्वैष्णवं पदमिति॥ अत्र मूलं चिंत्यं॥ तथा काशीखंडे। कार्तिके मासि ये वै

॥३३॥

६०

९

तामक्तितत्परैः॥ बिंदुतीर्थे कृतस्नानैस्तेषां मुक्तिर्न दूरतः॥ भार्गवाचिनदीपियंस्च
सिंहपुराणे॥ आगस्तिकुसुमैर्देवयोर्चयेच्च जनार्दनं॥ दर्शनात्तस्य देवर्षे नरकं
नाप्नुते नरः॥ विहाय सर्वपुष्पाणि मारिपुष्पाणि केशवं॥ कार्तिके योर्चयेद्भक्त्या
वाजपेय फलं लभेत्॥ स्कांदे कार्तिकमहात्म्ये॥ मालतीमालया विष्णुः केतक्या
वपूजितः॥ समाः सहस्रं सुप्रीतो भवते मधुसूदनः॥ पद्मीचं चंद्रीयदपाद्मे॥ कार्तिके
नार्चितो यैस्तु कमलैः कमलेक्षणः॥ जन्मकोटीषु विप्रेंद्र न तेषां कमला गृहे॥ त
कै४ थ्या॥ कार्तिके केशवे पूजा एषां नाम्ना स्तुते ऋते॥ ते निभस्त्यैव पुत्रवसंतित्रिदि
वे सदा॥ तुलसीदललक्षेन कार्तिके योर्चयेद्धरिं॥ पत्रपत्रे मुनिश्रेष्ठमौक्तिकं
लभते फलं॥ तथा स्कांदे कार्तिकमहात्म्ये॥ धात्रीछायातु यः कुर्यात्पिंडदानं महा
मुने॥ मुक्तिं प्रयांति पितरः प्रसादान्माधवस्य तु॥ धात्रीफलविलिप्तांगो धात्री

66

फलविभूषितः। धात्रीफलकृताहारो नरो नारायणो भवेत्॥ धात्रीछायां समाश्रि
त्य यो न्वै यश्च कपारिणं। पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः॥ तथा स्कांदे। कार्तिके
मासि विप्रेंद्र धात्रीवृक्षोपशोभिते। वने दामोदरं विष्णुं विना नैस्तोषयेद्विष्णुमर्चले
न पापसे नाथहा मकुर्याद्विचक्षणः। ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुंजीत बंधुभि
रिति। तथा कार्तिके द्विदलव्रतं प्रागुक्तं। कार्तिके द्विदलं त्यजेदिति। पाद्मे कार्तिकम
हात्मे। राजीकां मादकं चैव नैवाद्यात्कार्तिकव्रती। द्विदलं तिलतैलं च तथान्नमन्य
ति दूषितं। स्कांदेपि। कार्तिके वर्जयेत्तद्वद्द्विदलं बहुबीजकं। माषमुद्गमसूरांश्च
चणकाश्च कुलत्थकाः। निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतं। एतैर्नान्यपि
न्यपि जीर्णानि सर्वाण्येतानि वर्जयेत्। अत्र केचित्। उत्पत्तिसमये दलद्वयं यस्य भ ॥२४॥
वति तदुद्भवपदवीगत्या द्विदलमुच्यते इत्याहुः। उदाहरंति च। बीजमेव समुद्भूतं द्वि

१०

67

दलं वांकुरं विना। दृश्यते यत्र सस्येषु द्विदलं तन्निगद्यत इति॥ अलुलक्षणं यां मानां
भावाद्रूवनस्य चानिर्मलत्वाद्विलासमर्कय स्य स्वरूपं तदेव वर्जयेदित्याहुः॥ तथा
नारदीये। कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु। कार्तिके वर्जयेत्कांस्यं कार्तिके
शुक्लसंधितं॥ कांस्यं तत्पात्रभोजनं। शुक्लं पर्युषितं। संधितं लवणशाकः। तथा॥
कार्तिके विमलत्ये ग्रेदिपदानादि वर्जयेत्। तथा। कार्तिके तु कृतादीक्षो न्वर्णां जन्मवि
मोचनी। तथा। कार्तिके कृच्छ्रसेवीयः प्राजापत्यपरोथवा। एकांतरोपवासी वा त्रिरा
त्रोपोषितोपि वा॥ खंड्वा द्वादशपक्षं वा मासं वा बरवर्णिनी। एकभक्तेन नक्तेन तथै
वायाचितेन वा। उपवासेन भैक्ष्येण व्रजते तत्परं पदं॥ अन्येपि नियमाः प्रागुक्ता।
ग्राम्य मकुक्तं स्कांदे। व्रीहयो यवगोधूमाः प्रियंगु तिलशाकयः। एते हि सात्विकाः प्रो
क्ताः स्वर्गमोक्षफलप्रदाः॥ काशीखंडे॥ ऊर्जे यवान्नमश्नीयादेवान्नमथवा पुनः॥

वंताकंसरणांचैवमस्रकशीवीश्रवर्जयेत॥षष्ठीचंद्रोदयेपाकेनोजीविंध्योविधातव्यो
व्रतीनाकेनचित्क्वचित्॥तथानारदीये॥अव्रतेनचयेयस्तुमासंदामोदरप्रियं॥
तिर्यग्योनियवाप्नोतिनात्रकार्याविचारणा॥अन्यान्यपितांबूलतैलकेशकर्तना
दीवर्जनसंकल्परूपाणिप्रागुक्तानि॥तथाकार्तिकेआकाशदीपउक्तोनिर्णया
मृतेपुष्करपुराणे॥तुलायांतिलतैलेनसायंकालेसमागते॥आकाशदीपं
योदद्यान्मासमेकंहरिंप्रति॥महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति॥
तद्विधिस्तुहेमाद्रौआदित्यपुराणे॥दिवाकरेस्ताचलमौलिभूतेगृहाददूरेपु
रुषप्रमाणं॥यूपाकृतियज्ञियवृक्षदारुमारोप्यभूमावथतस्यमूर्ध्नि॥कुर्या ॥२५॥
वतस्वाष्टदलाकृतिस्तयोमिभैवेदष्टदिग्भागानुसारी॥तत्कर्णिकायांतुमहाप्र
काशोदीपप्रदेयोदलगास्तथाष्टौ॥निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथ

धर्मराज्ञे। प्रजापतिभ्यः स्वधयसपित्रभ्य। प्रेतेभ्य एवाप्यतमस्थितेभ्य इति। अप
रार्के चन्द्रोमंत्र उक्तः। यथा। दामोदरायनम सितुलायां लोलया सह। प्रदीपं
ते प्रयच्छामि नमोनंताय वेधसे इति। कार्तिक कृष्ण चतुर्थी करकचतुर्थी। सा
चंद्रोदयव्यापिनी ग्राह्या। तत्रैव प्रजा धाम्नानात्। कार्तिककृष्णद्वादशी गो
वत्ससंज्ञा। सा प्रदोषव्यापिनी ग्राह्या। दिनद्वये तत्वे पूर्वा युग्मवाक्यात्। वत्स
पूजा वृदश्चैव कर्तव्या प्रथमेहनीति। निर्णयामृते निषानाच्चो अत्र विशेषो म
दनरत्ने भविष्ये। सवत्सां तुल्यवर्णाभ्वत्सलिनीं गां पयस्विनीं। चंदनादिभिरा
लभ्य पुष्पमालाभिरर्चयेत्। अर्घ्यं ताम्रमयपात्रे कृत्वा पुष्पाक्षतैस्तिलैः।
पादमूले तु दद्यादिमंत्रेणानेनपांडव। क्षीरोदार्णवसंभूते सुरासुरनमस्कृ
ते। सर्वदेवमये मातर्गृहाणार्घ्यं नमोनमः। ततो माषादिसंसिद्धान् वटकान्विनि

वंदयेत्॥ सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता॥ सर्वदेवमये ग्रासं मया दत्तमि
दं ग्रस॥ ततः सर्वदेवमये देवि सर्वदेवैरलंकृते॥ मातर्ममाभिलषितं सफ
लं कुरु नंदिनी इति प्रार्थयेत्॥ तथा॥ तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर॥ -श्री
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत्॥ ज्योतिर्निबंधे नारदः॥ आश्विने
कृष्णपक्षे तु द्वादश्यादिषु पंचसु॥ तिथिषूक्तः पूर्वरात्रे नृणां नीराजनावि
धिः॥ नीराजयेयुर्देवांस्तु विप्रान्गाश्च तुरंगमान्॥ ज्येष्ठान्श्रेष्ठान्कनि
ष्ठांश्च मातृमुख्याः स्त्रियोपि ता इति निर्णयामृते स्कांदे॥ कार्तिकस्यासिते पक्षे
त्रयोदश्यां निशामुखे॥ यमदीपं बहिर्दद्यादपमृत्युर्विनश्यतीति॥ मंत्र ॥२६॥
स्तु॥ मृत्युना पाशदंडाभ्यां कालेन श्यामया सह॥ त्रयोदश्यां दीपदानात्सू
र्यजः प्रीयतां मम इति॥ कार्तिककृष्णचतुर्दश्यां प्रभाते चंद्रोदये भ्यंगं कुर्यात्॥ ते

१

दुक्तं हेमाद्रौ निर्णयामृते च भविष्योत्तरे॥ कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोद
ये॥ अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः॥ पूर्वविद्धचतुर्दश्यां कार्तिकस्य
सितेतरे॥ प्रत्यूषसमये स्नानं कुर्यात्सप्रयत्नतः इति॥ स्मृतिदर्पणेपि॥ चतु
र्दशीयाश्वयुजस्य कृष्णा स्वात्यर्कयुक्ता च भवेत्प्रभाते। स्नानं समभ्यज्य नरैः
स्तु कार्यं सुगंधतैलेन विमुक्तिकामैरिति। चंद्रोदये व्याप्तेः। आश्वयुक्कृष्ण
पक्षस्य चतुर्दश्यां विधूदये। तिलतैलेन कर्तव्यं स्नानं नरकभीरुभिः। कर्तव्यं
मंगलस्नानं नरैर्निरयभीरुभिरिति कालादर्शे पाठः। उभययोगाभावे त्या
मावास्यांतमासमभिप्रेत्योक्तं। तथा। तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्द
शीं॥ प्राप्येति शेषः॥ प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यतीति दिनद्वयेपि चं
द्रोदये चतुर्दशीसत्वे पूर्वदिनेऽभ्यंगं कुर्यात्॥ पूर्वविद्धचतुर्दशीमिति वचना

त॥ पूर्वदिने परदिन एव वा सत्वे सैव ग्राह्या॥ दिवोदासीये पक्षे तु चतुर्दशीह्रासं पू
र्वेद्युः प्रवेश्य पूर्वेह्नि त्रयोदशीमध्य एव वाभ्यंगं कुर्यादिति दिवोदासः॥ केचिदत्र व
चनमपि साधकत्वेन वदंति। तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेहनि। तावा
न् ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति। तन्मंदं। नहिदं वचनं पूर्वदिनस्या
पूर्वग्राह्यत्वं विधत्ते नतैककर्मा कृष्णजन्माष्टम्यादौ दिनद्वयकर्मकालव्याप्त्यभा
वे सर्वत्र पूर्वदिनस्य ग्राह्यत्वप्रसंगात्॥ किंतु यत्रैककर्मकालो दिनद्वये कर्मका
लव्याप्त्यभावे वाक्यांतरेण न्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तं तत्र मुख्य
काले तत्तिथेरभावेपि तत्रैवानुष्ठानबोधकमिदं॥ न वात्र तदस्तीति यत्। किंचि
दं तत्॥ तेन चतुर्थयामगामिनी ग्राह्या॥ अत एव सर्वज्ञनारायणः। तथा च कृष्णच ॥३७॥
तुर्दश्यामाश्विने कौदयात्पुरा॥ यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यते इ

73

ति॥ अभ्यंगोदयवेलायां त्रयोदश्यां यदा भवेत्॥ दर्शे वा मंगलस्नानं दुःखशो
कभयप्रदमिति कालादर्शे त्रयोदशीनिषेधोक्तं॥ यदपि त्रयोदशी यदा प्रातः
क्षयं याति चतुर्दशी॥ रात्रिशेषे त्वमावास्या तदाभ्यंगे त्रयोदशीति क्वचनं तद्धेमा
द्रिनिर्णयामृताद्यलिखितत्वेन निर्मूलं॥ सम्मूलत्वेपि न चतुर्दश्याः सूर्योदयद्व
यसंबंधित्वरूपः क्षयो विवक्षितः। सूर्योदयात्प्राक्समाप्तौ चंद्रोदयकालस
त्त्वस्यैवानंगीकारात्। किंतु अभ्यंगकालात्प्राक्समाप्तिरूपो न ह्रासः क्षय
शब्देन विवक्षितः। स चतुर्थयामात्प्राक् यदा ह्रासस्तत्परमिदं। अत एव सर्वेश
नारायणेन चतुर्थयाममात्रे स्नानमुक्तं। तथा वादाहृतं। तथाच स्वल्पचतुर्दश्या
मिति॥ ज्योतिर्निबंधे नारदोपि। इषासितचतुर्दश्यामिंदुक्षयतिथावपि॥ ऊर्
जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्। कुर्यात्संलग्नमेतच्च दीपोत्सवदिन

त्रयं॥येन त्रयोदशीमध्ये स्नानमाहुस्तेषामाशयं न विद्मः इत्यलं न्यसा॥यदपि॥
अरुणोदयतोन्यत्र रिक्तायां स्नाति यो नरः। तस्याब्दिकयो धर्मो नश्यत्येव न सं
शयः॥ इति दिवोदासीये भविष्ये च वचनं तत्कृत्यकाले चतुर्दश्यभावेपि स्तत्रै
व स्नातव्यमित्येवंपरमिति सर्वं शिवं॥ चतुर्थी चिकोसको अरुणोदय इति॥ त
त्रैवोक्तं॥ तथा पाद्मे॥ अपामार्गं तथा तुंबीं प्रपुन्नाटमथापरं॥ भ्रामयेत् स्नानमध्ये
तु नरकस्य क्षयाय वै॥ प्रपुन्नाटश्चक्रमर्दनः॥ मंत्रस्तु॥ सीतालोष्टसमायु
क्तं सकंटकदलान्वित। हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति॥ अत्रै
व प्रदोषे दीपान् दद्यादित्युक्तं॥ हेमाद्रौ स्कांदे॥ ततः प्रदोषसमये दीपान्
दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति॥ दिवो
दासीये ब्राह्मे॥ अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः॥ यममार्गांधकार

॥३८५

८

न्यासमुच्यते कार्तिके नरः ॥ खंडतिथौ तु पूर्वेद्युः प्रदोषे दीपान्दत्वा परेद्युः स्नाया
दिति दिवोदासीये उक्तं ॥ तत्रैव लैंगे ॥ माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः ॥
प्रेताख्यायां चतुर्दश्यां कार्यं तु यमतर्पणं ॥ मदनरत्ने ब्राह्मेपि ॥ अत्र यमतर्पणमु
क्तं ॥ मदनपारिजाते वृद्धमनुः ॥ नदीपोस्य चतुर्दश्यां कार्यं तु यमतर्पणं ॥ मदनर
त्ने ब्राह्मेपि ॥ अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि ॥ ततश्च तर्पणं कार्यं ध
र्मराजस्य नामभिः ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय काला
य सर्वभूतक्षयाय च ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चि
त्राय चित्रगुप्ताय वै नमः इति ॥ तथा ॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना थ
वेति ॥ इदं जीवत्पितृकेणापि कार्यं जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ॥
रिति पाद्मोक्तेः ॥ अभीष्मतर्पणमिह उक्तं दिवोदासीये तत्प्रकारस्तु माघे वक्ष्या

धा १

७००

ते॥ इतिनरकचतुर्दशी॥ ॥कार्तिकामावास्यायां प्रातरभ्यंगं कुर्यात॥ तदुक्तं का
लादर्शे॥ प्रत्युष आश्वयुग्दर्शे कृताभ्यंगादिमंगलः। भक्त्या प्रपूजयेल्लक्ष्मीं
मलक्ष्मीविनिवृत्तये॥ अस्य व्याख्याने॥ आदिशब्दात्पंचत्वगुदकस्नानादे
रुपसंग्रहः॥ तदुक्तं पुष्करपुराणे। स्वातिस्थिते रवाविंदुर्यदि स्वातिगतो भवे
त्॥ पंचत्वगुदकस्नाई कृताभ्यंगविधिर्नरः। नीराजितो महालक्ष्मीमर्च
यन्श्रियमश्नुते॥ आश्वयुक्दर्शे इति दर्शशब्दः प्रत्युषस्वातियुक्ततिथि
परः। तदुक्तं ब्राह्मे। ऊर्जस्य शुक्लद्वितीयांततिथिषु स्वातिरुदगोमानवो मंग
लस्नायी नैवलक्ष्म्या वियुज्यते॥ तत्रैव॥ इषभूतेच दर्शे च कार्तिकप्रथमे दि
ने। यदा स्वातिस्तदाभ्यंगस्नानं कुर्याद्दिनोदये। कश्यपसंहितायाम्॥ दीपा
वलीदर्शे प्रक्रम्य। इंदुक्षये पि संक्रांतौ रवौ पाते दिनक्षये। तत्राभ्यंगो न दो

॥३९॥

२

षाय प्रातः पापापनुत्तये इति स्वातियोगं विनाप्यभ्यंग उक्तः। मास्यां दीपनीरा
जनादत्र सैषा दीपावली स्मृता। अत्र विशेषो हेमाद्रौ भविष्ये॥ दिवा तत्र न
भोक्तव्यमृते बालातुराज्जनात्॥ प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्।
दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च। तेनैवाभ्येगमजिवाय। एवं प्रभा
ते समये त्वमावास्यां नराधिप। कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः॥
दीपान् दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि। स्वलंकृतेन भोक्तव्यं शीतवस्त्रो
पशोभिना। अयं प्रदोषव्यापिनी ग्राह्या। तुलासंस्थे सहस्रांशौ प्रदोषे भूतद
र्शयोः॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्॥ इति ज्योतिषोक्तेः।
दिनद्वये सत्वे परा। दंडैकरजनीयोगे दर्शः स्यात्तु परेहनि। तदा विहाय पूर्वेद्युः
परान्हि सुखरात्रिके॥ तिथितत्वे ज्योतिर्वचनात्॥ दिवोदासीये तु प्रदोषस्य

कर्मकालव्याप्तता । अर्द्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान् । अतः स्वलंकृता
लिप्ता दीपैर्जाग्रज्जनोत्सवाः । सुधावधवलिताः कार्याः पुष्पमालोपशोभिता इ
ति ब्राह्मोक्तेश्च प्रदोषार्द्धरात्रव्यापिनी मुख्या । एकैकव्याप्तौ परैव । प्रदोषस्य
मुख्यत्वादर्धरात्रेनुष्ठेयाभावाच्च । यत्तु अपराह्णे प्रकर्तव्यं श्राद्धं पितृपरा
यणैः । प्रदोषसमये राजन् कर्तव्या दीपमालिकेति क्रमः संपूर्णतिथावेवोक्त
कर्मकालव्याप्त्यवलंबत्वादुक्तो । अतएव दर्शे पररात्रे अलक्ष्मीनिःसारण
मुक्तं मदनरत्ने भविष्ये । एवं गते निशीथे तु जने निद्रार्द्धलोचने । तावन्नग
रनारीभिः शूर्पडिंडिमवादनैः । निःसार्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहा
ङ्गणात् । कार्तिकशुक्लप्रतिपति गोक्रीडनमुक्तं निर्णयामृते । अस्यामे ॥४०॥
व रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये । कृत्वैतत्सर्वमेदेवहराचौ दैत्यपते

बलेः। पूजां कुर्यान्नृपः साक्षाद्भूमौ मंडलके शुभे। बलिमालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः। गृहस्य मध्ये शालायां विशालायां ततोर्चयेत्। लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंडुलैः। संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥ मंत्रस्तु पाद्मे। बलिराज नमस्तुभ्यं दैत्यदानववंदित। इंद्रशत्रोमराराते विष्णुसान्निध्यदो भव॥ तथा बलिमुद्दिश्य दीयते दानानि कुरुनंदन। यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितमिति। तत्र पूर्वविद्धा प्रतिपदि कर्तव्या। पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः। माधवीयेपि। बल्युत्सवं च पूर्वेद्युरुपवासं सदाचरेदिति। निर्णयामृतेपि। याः कुहूप्रतिपन्मिश्रास्तत्र गाः पूजयेन्नृप। पूजनाच्च विवर्धंते प्रजा गावो महीपतिरिति। तथा। नंदायां गोकुलक्रीडां सदैव विनश्यतीति। नंदायां तु

८

द्वितीयायां॥ तथा॥ प्रतिपद्यग्निकरणं द्वितीयायां तु गोर्चनं॥ छत्रच्छेदं करि
ष्यंतिवितनारी कुलक्षयमिति॥ तथा॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां त
तं॥ परविद्धेषु यः कुर्यात्सुतदारधनक्षयइति देवलवचनाच्चाप्येतेच वि
विप्रतिषेधः॥ पूर्वदिने प्रतिपादः सायाह्नव्यापित्वे द्वितीयदिने चेंद्रदर्शन
संभवेच्चेद्यथाः गवां क्रीडादिने रात्रौ दृश्येत चंद्रमाः॥ सोमो राजा पशून्हं
ति सुरभी पूजकांस्तथेति पुराणसमुच्चयात् दिनद्वये सायाह्नव्यापित्वे॥
तु परैव ग्राह्या॥ वर्धमानतिथौ नंदा यदा सार्धत्रियामिका॥ द्वितीया वृद्धिगा
मि वा उत्तरा तत्र चोच्यत इति॥ तथा॥ त्रियामगा दर्शतिथिर्भवेच्चेत्सार्धत्रि
यामा प्रतिपद्विवृद्धौ॥ दीपोत्सवे तेमुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुते
विधेय इति पुराणसमुच्चयादिति निर्णयामृतकारः॥ सार्धत्रियामिके ॥८१॥

निर्णय०

त्यनेन चंद्रदर्शनाभाव उक्तः॥ द्वितीयायाः पंचयामरूक्दिनचतुर्थांशः कल्हपाप
राज्ञव्याप्तावेवा चंद्रदर्शनसंभवात्। वयं तु तद्दिनद्वयं पूर्वविद्धा संभवे वेदि
तव्यमिति ब्रूमः। दिनद्वये प्रतिपदः सायाह्नव्याप्त्यभावे तु पूर्वैव रात्रौ बलि
पूजाविधानेन कर्मकालव्यापित्वात्। परदिने चंद्रोदयतन्निषेधादिति दिक्॥ मद
नरत्ने तु पूर्वविद्धायां गोक्रीडा। नीराजनमंगलमालिकेनुत्तरत्र कार्ये। का
र्तिकशुक्लपक्षे तु विधानद्वितयं भवेत्॥ नारी नीराजनं प्रातः सायं मंगलमालिका॥
यदा च प्रतिपत्स्वल्पा नारीनीराजनं भवेत्॥ द्वितीयायां तदा कुर्यात्सायं मंगल
मालिकामिति ब्राह्मोक्तेः॥ लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयं॥ तस्यां नी
राजनं कार्यं सायं मंगलमालिकेति भविष्योक्तेः॥ प्रातर्वा यदि लभ्येत प्रतिपत्स्व

सिंधौ०

टिकास्तुभा॥ द्वितीयायां तदा तदा कुर्यात्सायं मंगलमालिकां॥ कार्तिके शुक्लपक्षे
दौ अमावास्या घटिद्वयं दिशामंगलयान्नैव कुर्यान्मंगलमालिकां॥ इति देवि
पुराणोक्तेः॥ अत्र विशेषो हेमाद्रौ ब्राह्मे॥ बलिप्रतिपदप्रक्रम्य॥ तस्मा
द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः॥ तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः॥
पराजयो रुद्धस्य लाभनाशकरो भवेत्॥ दयितामिश्च सहितैर्नेया सा च भवे
न्निशेति॥ अत्र गोवर्धनपूजादिमार्गपालीपूजनादि चोक्तं हेमाद्रौ निर्ण
यामृते स्कांदे॥ प्रातर्गोवर्धनं पूज्य द्यूतं चापि समाचरेत्॥ भूषणीयास्तथा
गावः पूज्याश्चावाहदोहनाः॥ गोवर्धनश्च गोमयेन कार्यो त्रेव॥ मंत्रस्तु॥ गो
वर्धन धराधार गोकुलत्राणकारण॥ बहुबाहुकृतच्छाय गवां कोटिप्रदो भव॥

॥४२॥ ॥४२॥

८

गामंत्रस्तु॥ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता॥ घृतं वहति यज्ञार्थे मम पापं व्यपोहतु॥ तत्रैव स्कांदे॥ ततोपराह्णसमये पूर्वस्यां दिशि भारत॥ मार्गपाली प्रबध्नीयात्तुंगस्तंभेथवा पदे॥ कुशकाशमयीं दिव्यां लंबकैर्बहुभिस्तुने॥ दक्षयित्वा गजान्नश्वान्त्साय मस्यां तले नयेत्॥ कृते होमे द्विजेंद्रस्तु बध्नीयान्मार्गपालिकां॥ नमस्कारं ततः कुर्यान्मंत्रेणानेन सुव्रत॥ मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे॥ विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे॥ नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदं॥ राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः॥ मार्गपाली समुल्लंघ्य निरुजः स्युः सुखान्विताः॥ तत्रैवादित्यपुराणे॥ कुशकाशमयीं कुर्याद्दृष्टिकां सुदृढां नवां॥ तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः॥ गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः॥ जयेद्धीनजातीनां जयो राजस्तु वत्सरमिति॥

यम्यद्वितीयातु प्रतिपद्युताग्राह्येत्युक्तं निर्णयामृतादौ ॥ यदपि द्वितीया मध्याह्न
व्यापिनी पूर्वविद्धा चेति चेमाद्रिः ॥ अविशेषो हेमाद्रौ स्कांदे ॥ ऊर्जे शुक्ल द्वि
तीयायां पराह्णे र्चयेद्यमं । स्नानं कृत्वा भानुजायां यमलोकं न पश्य
ति ॥ ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ॥ वेष्टितः किन्नरै र्हृष्टैस्त
स्मै यच्छति वांछितं ॥ तथा भविष्ये ॥ प्रथमं श्रावणे मासि तथा भाद्रपदे परा
त्रयोतीश्वयुजे मासि चतुर्थी कार्तिकी भवेत् ॥ श्रावणे कलुषा नाम तथा
भाद्रे च निर्मला ॥ आश्विने प्रेतसंचारा कार्तिके याम्यकामतेस्मृता ॥ प्रथ
मायां व्रतं द्वितीयायां युधिष्ठिर । यमो यमुनया पूर्वं भोजितः स्वगृहे स्थितः ॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ॥ अस्यां निजगृहे विप्र न भोक्त ॥४३॥
व्यं ततो नरैः ॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनं ॥ दानानि च प्रदे
सरस्वती पूजा तृतीयायां श्राद्धमुक्त्वा चतुर्थीमुक्तं ॥ कार्तिके शुक्लपक्षस्य द्वितीयायां

85

सं॰ २

यानि भगिनीभ्यो विधानतः॥ स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः॥ सर्वा भगिन्यः पूज्या अभावे प्रतिपन्नकाः॥ प्रतिपन्नाः मता भगिन्यः॥ इति हेमाद्रिः॥ पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर॥ मातुलस्य सुताहस्ताद्द्वितीयायां तथा नृप॥ पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात्॥ भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परं॥ सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनं॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतिगतस्वसृसौहृदेन॥ तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नसुखधान्यमनुत्तमं सः॥ इति॥ यमं च यमदूतं च चित्रगुप्तांश्च पूजयेत्॥ अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः॥ मंत्रः॥ एह्येहि मार्तंडज पा

८

शाहस्तयमांतकालोकधरामरेश॥भ्रातुर्द्वितीयाकृतदेवपूजांगृहाणचार्घ्यं
भगवन्नमस्ते॥भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिदं शुभं। प्रीतये यमराज
स्य यमुनाया विशेषतः॥ ज्येष्ठा अग्रे जातेति वदेदिति स्मार्ताः॥ इयं च दा
नमित्याहुः॥ ब्रह्माण्डपुराणेपि॥ या तु भोजयते नारी भ्रातरं युग्मके तिथौ॥
अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात्॥ भ्रातुरायुःक्षयो राजन्न
नवत्तत्र कर्हिचिदिति॥ कार्तिकशुक्लनवमी युगादिः सा पौर्वाह्निकी ग्राह्या॥
शुक्लपक्षे त्वात॥ अन्यत्प्रागुक्तं॥ अत्रैव विष्णुत्रिरात्रमुक्तं हेमाद्रौ पाद्मे॥
कार्तिकि शुक्लनवमीमवास्या विजितेन्द्रियः॥ हरिं विधाय सौवर्णं तुलस्य ॥५५॥
॥५५॥ साहितं विष्णुं पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयं॥ एवं यथोक्तविधि
नाकुर्याद्वै वा हि किं विधिरिति॥ कार्तिकशुक्लैकादश्यां भीष्मपंचकव्रतमुक्तं॥

कृ

87

नारदीये॥ अतो नरैः प्रयत्नेन कर्तव्यं भीष्मपंचकं॥ कार्तिकस्यामले पक्षे स्ना
त्वा सम्यग्यतव्रतः। एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकं॥ कार्तिकस्या
मले पक्षे स्नात्वा सम्यग्यतव्रतः। तद्विधिः स्नानं द्याः गोमयेन स्नात्वा मौनी
पंचामृतैः पंचगव्यैर्विष्णुं संस्नाप्य संपूज्य पायसं निवेद्य द्वादशाक्षर
मष्टोत्तरशतं जप्त्वा ॐ नमो विष्णवे इति षडाक्षरेण घृताक्तयवान्व्री
हींश्चाष्टोत्तरशतं हुत्वा भूमौ स्वपेत॥ एवं पंचदिनेषु कुर्यात॥ विशेष
स्तु॥ आद्येऽह्नि हरेः कमलैः पादौ संपूज्य गोमयं प्राश्नीयात। द्वितीये बिल्व
पत्रैः जानुनी संपूज्य गोमूत्रं। त्रयोदश्यां भृंगराजेन नाभिं संपूज्य क्षी
रं। चतुर्दश्यां करवीरैः स्कंधौ संपूज्य दधि। पौर्णमास्यां होमांते लौहिपं

प्रप्रतिमां खड्गचक्रहस्तां रक्तवस्त्रवेष्टितां प्रस्थतिलोपरिस्थां कृत्वा ध
र्मराजनामभक्तिः करवीरैः संपूज्य यदन्यजन्मनि कृतमिह जन्मनि वा पु
नः ॥ तत्सर्वं प्रशमं यातु मत्पापं तव पूजनादिति । पुष्पांजलिं दत्वा कृष्णप्र
तिमां च संपूज्य विप्राय दत्वा ॥ विप्रान्संभोज्य दक्षिणां दत्वा पंचगव्यं प्रा
श्य पारणमास्यानकं कुर्जितेति ॥ लघुनारदीये ॥ पंचगव्याशनं षडद
रपणीत हेमाद्रिः ॥ हेमाद्रौ नविज्ञेयतु ॥ चान्द्रे मुख्य नैवा पंचाहं व्रतं नभ्रु
क्तं ॥ अतः पुक्तं ॥ याज्ञिष्मपंचकमिति प्रथितं द्विष्ठि व्यामेकादशीप्रभृति प
ञ्चदशी निरुद्धं ॥ भुक्त्यन्नभोजनपरस्य नरस्य तस्मिन्निष्फलं दिशति ॥४५॥
पांडवगाङ्गेयं चैति ॥ तथा पाद्मे ॥ पंचाहं पगव्यासी भीष्मयाच्यं च पंच
कं ॥ अहरस्य पितृभ्यो दंधान्मंत्रेणानेन सुव्रत ॥ सत्यव्रताय शुचये गांगे

८

८९

यायमहात्मने॥भीष्मायैतं ददाम्यर्घ्यं आजन्मब्रह्मचारिणे॥वैय्याघ्र्यप
द्यगोत्रायेति च॥सव्येनानेन मंत्रेण तर्पणं सार्ववर्णिकमिति॥कार्तिक
शुक्लद्वादश्यां रेवती न दत्तयोगरहिता यो पारणं कार्यं॥तदुक्तं हेमाद्रौ
आभाकासितपक्षेषु मैत्रश्रवणरेवती॥संगमे नहि भोक्तव्यं द्वादशीं द्वा
दशीं हरेदिति॥यदा तु रेवतीयोगरहिता द्वादशी सर्वथा न लभ्यते तदा रे
वत्याश्चतुर्थपादं वर्जयेत्॥वचनं तु प्रागुक्तं॥लघुनारदीये॥कार्तिके शु
क्लपक्षस्य कृत्वा वैकादशी नरः॥प्रातर्दत्वा शुभान् कुंभान् प्रयाति हरमं
दिरं॥मदनरत्ने वाराहे॥एकादशी सोमयुता कार्तिके मासि भामिनी॥उ
त्तराषाढसंयोगे अनंता सा प्रकीर्तिता॥तस्यां यत्क्रियते भद्रे सर्वमानंत
मच्युत॥अस्यामेव रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे॥एकादश्यां तु

८

शुक्लायां कार्तिके मासि केशवं॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित:॥
इति मदनरत्ने पि भविष्ये॥ कार्तिके शुक्लपक्षे तु एकादश्यां यथाश्रुत॥ मं
त्रेणानेन राजेन्द्र देवमुत्थापयेद्द्विज:॥ रामार्चनचंद्रिकायां तु द्वादश्यामु
क्तं॥ पारणात्पूर्वरात्रे घंटादीन्वादयेन्मुहुरिति॥ अन्ये देशाचारतो व्यव
स्था॥ तत्रैव देवस्य स्नानपूर्वं महद्भवेत॥ महोत्सवं ततः कृत्वा देवमुत्था
पयेत्सुधी:॥ मंत्रास्तु वाराहपुराणे उक्ता:॥ ॐ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्
यसोमादिभिर्वंदितवंदनीय। बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सुखे
न देव॥ इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता॥ त्वयैव सर्वलोकानां हि ॥४८॥
तार्थं शेषशायिना॥ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते॥ त्वयि सु
प्ते जगन्नाथ जगत्सुप्तं भवेदिदं॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव

व॥ गतामे घाविवयश्चैव निर्मलं निर्मला दिशः॥ शारदानां च पुष्पाणि
गृहाणमम केशव॥ इदं विष्णुरिति प्रोक्तो मंत्रमुत्थापने हरेरिति॥ एवं
देवमुत्थाप्य तदग्रे चातुर्मास्यव्रतसमाप्तिं कुर्यात्॥ तदुक्तं भारते॥ चतु
र्गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः॥ कार्तिके शुक्लपक्षे तु द्वादश्यां तत्स
मापयेत्॥ लघुनारदीये॥ चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता॥
मंत्रश्च निर्णयामृते। सनत्कुमारोक्तः॥ इदं व्रतं मया देव कृतं प्रीत्यै तव
प्रभो॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति॥ तथा ब्राह्मे॥ महात्
ग्रेर(?)वरात्रौ ग्रामयस्य देने स्थितं॥ गृहीतं देव देवेश नगरे पार्थिवः स्व
यं॥ चतुरो वार्षिकान् मासान् नियमं यस्य यत्कृतं॥ कथयित्वा द्विजेभ्य
स्तं दद्याद्भक्त्या सदक्षिणं॥ यस्य यत् चास्य नियमं कृतं न द्रव्यं दद्यादि

दिनद्वयेतद्व्याप्तौनिशीथप्रदोषव्यापिनीग्राह्या॥४

यर्थे॥इदंशुक्रास्तादावपिकार्यं॥आरौ॥चतुष्पूजामन्त्येनकारयेत्॥का
र्तिकद्वादशीपौर्णमासीचमन्वादि॥सापौर्वाह्निकीग्राह्या॥अन्यत्रा
युक्ते।कार्तीकशुक्लचतुर्दशीवैकुंठसंज्ञा॥सानिशीथव्यापिनीग्रा
ह्या॥तदुक्तंहेमाद्रौभविष्ये॥कार्तिकस्यसितेपक्षेचतुर्दश्यांनराधिप॥
सोपवासस्तुसंपूज्याहरीरात्रौजितेंद्रियइति॥अस्यामेवविश्वेश्व
रप्रतिष्ठादिनत्वात्तस्यैतदर्थंयदोपवासादिक्रियतेतदाअरुणोदयव्या
पिनीग्राह्या॥तदुक्तंत्रिस्थलीसेतौसनत्कुमारसंहितायां॥वर्षेचहे
मलंबाख्यमासश्रीमतिकार्तिके॥शुक्लपक्षेचतुर्दश्यामरुणाभ्युद ॥४७॥
यंप्रति॥महादेवतिथौब्राह्ममुहूर्तेमणिकर्णिके॥स्नात्वाविश्वेश्वरो

व्या देवौविश्वेश्वरमपूजयमिति॥तत्रवैदिनेचोपवासःकार्यः॥ततः

९३

प्रभातेविमलेकृत्वापूजांमहद्भुतां॥दंडपाणेर्महाधाम्नीवनेस्मिन्नकृत
पारणं॥इतितत्रैवोक्तेः॥अत्रकार्तिकोद्यापनमुक्तंपाद्मेकार्तिकमहा
त्मे॥अथोर्जव्रतनःसम्यगुद्यापनविधिंशृणु॥ऊर्जस्यशुक्लचतुर्द
श्यांकुर्यादुद्यापनंव्रती॥तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां॥
तुलसीमूलदेशेतुसर्वतोभद्रमेवच॥तस्योपरिष्टात्कलशंपंचरत्न
समन्वितं॥पूजयेत्तत्रदेवेशंसौवर्णंगुर्वनुज्ञया॥रात्रौजागरणंकु
र्याद्गीतवादित्रमंगलैः॥ततःस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान्॥
त्रिंशन्मितानथैकंवास्वशक्त्यावानिमंत्रयेत्॥अतोदेवाइतिद्वाभ्यांजु
हुयात्तिलपायसं॥ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरूमिति॥कार्ति

कपौर्णमासी परा ग्राह्या ॥ अमापौर्णमास्यौ परेति दीपिकोक्तेः ॥ अविशेषो
हेमाद्रौ ब्राह्मे । पुण्या महाकार्तिकी स्याज्जीवेन्दौ कृत्तिकासु च ॥ तथा ॥ आ
ग्नेयं तु यदा रुक्षं कार्तिक्यां भवति क्वचित् ॥ महती सा तिथिर्ज्ञेया स्नानदा
नेषु चोत्तमा ॥ यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित् ॥ तिथिः सापि म
हापुण्या मुनिभिः परिकीर्तिता ॥ प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नरा
धिप ॥ सा महाकार्तिकी प्रोक्ता देवतामपि दुर्लभेति ॥ पाद्मे ॥ विशाखासु
यदा भानुः कृत्तिकासु च चन्द्रमाः ॥ स योगः पद्मको नाम पुष्करे त्वतिदुर्लभः ॥
पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति ॥ स हित्वा सर्वपापानि वैष्णवं लभे ॥४८॥
त्पदं ॥ यमः ॥ कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ॥ माघ्यां स्नातः प्र
यागे तु मुच्यते सर्वकिल्बिषैः ॥ अस्यामेव सायंकाले मत्स्यावतारः ॥ जातः

तदुक्तं पाद्मे ॥ कार्तिके महामासे ॥ वरां दत्वा यतो विष्णुर्मत्स्यरूपोभवत्ततः ॥ तस्यां
दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतमिति ॥ अत्र त्रिपुरोत्सव उक्तो भार्गवार्च
नदीपिकायां ॥ पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः ॥ दद्यादनेन मंत्रे
त्रेण प्रदीपांश्च सुरालये ॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये
विचरंति जीवाः ॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि
विप्राः ॥ अत्र वृषोत्सर्गोपि प्रशस्तः । तदुक्तं मात्स्ये ॥ कार्तिक्यां यो वृषोत्सर्गं कृ
त्वा नक्तं समाचरेत् ॥ शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति । यत्र का
र्तिकीय दर्शनमुक्तं काशीखंडे ॥ कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वाम्य
दर्शनं ॥ सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ ॥ इति श्रीकमलाकरभ

॥मार्गशीर्षे कृष्णाष्टमी कालाष्टमी॥ सा
तिनिर्णयसिंधौ कार्तिकसमानं॥ ॥मार्गशीर्षे कृष्णाष्टम्यां कालभैरवसन्निधौ॥ उपो
षरात्रिव्यापिनी ग्राह्या॥ मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ॥ रात्रौ कृत्वा वर
ष्य जागरं कुर्यात् सर्वपापैः प्रमुच्यते॥ इति काशीखंडात्॥ रात्रौ कृत्वाव
तः॥ रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिरिति॥ ब्रह्मवैवर्ताच्च॥ दिनद्व
ये जाता रात्रौ व्याप्ता कुत्तरैव॥ भैरवोत्पत्तेः॥ प्रदोषकालीनत्वादिति केचि
त्॥ तन्न॥ शिवरहस्ये मध्याह्ने भैरवोत्पत्तेः श्रवणात्॥ तथा च तत्रैव॥ नित्यया
त्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ॥ विस्मयप्रक्रम्य ब्रह्मणा रुद्र उवज्ञाने उक्तो
तदोग्ररूपादन्ययान्मतः श्रीकालभैरवः॥ आविरासीत्तदा लोकान्भीषयं
निखिलानपीति॥ अत्रोपवासप्रभवप्रधानमित्युक्तं॥ तत्रैव॥ उपोषणस्यां
गभूतमर्घ्यदानमिहस्मृतं॥ तथा जागरणं रात्रौ पूजा यामचतुष्टये॥ संध्या

॥४९॥

९

९७

यामपिपूर्वैवोक्ता॥ तेन मध्याह्नव्यापिनी युक्ता॥ दिनद्वये ततः संपूर्णायां
वा तद्व्याप्तौ पूर्वैव॥ पूर्वोक्तवचनात्॥ प्रारणा तु प्रातरेव॥ यामत्रयोर्ध्वगामिन्यां
प्रातरेव हि पारणेति वचनात्॥ अनेनैव कालेनैरवपूजोक्ता॥ त्रिस्थलीसेतौ॥
कृत्वा चैव विधिवत्पूजां महासंभारविस्तरैः॥ नरो मार्गसितेष्टम्यां वार्षिकं
विघ्नमुत्सृजेत्॥ तथा॥ तीर्थकालोदकैः स्नात्वोत्तपर्णामर्पणः॥ विलोक्य त्वा ५
कालराज्ञीनं नियाद्दूरे स्थितानिति॥ इयमेव कार्तिकेयमंतरा गौरा त्रिवेड़ा
नि प्रायेण॥ मार्गशीर्षे शुक्लपंचम्यां नागपूजोक्ता हेमाद्रौ स्कांदे॥ शुक्ला मा
र्गशिरे पुण्या श्रावण्यां चैव पंचमी॥ स्नानदाने बहुफला नागलोकप्रदा
यिनी॥ इयं नागपूजायां षष्ठीयुतैव ग्राह्या॥ पंचमी नागपूजायां कार्या ष
ष्ठीसमन्विता॥ तस्यां तु तूषिता नागा इतरा सचतुर्थिकेति॥ मदनरत्नवचनात्॥

८

९९

दै२

मार्गशीर्षशुक्लषष्ठीति महाराष्ट्रेषु प्रसिद्धा॥ सा तूत्तरयुता ग्राह्या॥ षण्मुन्यो
रिति युग्मवाक्यात्॥ पूर्वोक्तं वैविक्तं कुर्यादिति वचनादस्य च दैवकर्मत्वात्॥
इयमनवयोगविशेषेणाचंपेत्युच्यते॥ तदुक्तं ब्रह्माण्डपुराणे मल्लारिमहात्म्ये॥
मार्गभाद्रपदेशुक्लाषष्ठी वैधृतिसंयुता॥ रविवारेण संयुक्ता सा पापौचेती
हकीर्तितेति॥ विशाखा सोमयोगेन सा चंपातीति मदनरत्ने पाठः॥ मार्ग
शीर्षमलैपदोषघ्नी वारेस्कुमाक्किनः॥ शाततारागते चंद्रे लिंगं स्याद् दृष्टि
गोचरमिति॥ इयं योगविशेषैर्विना पूर्वा परा वा कार्या॥ मार्गशीर्षशुक्लचतु
र्दश्यां पिशाचमोचनतीर्थे श्राद्धं त्रिस्थलीसेतौ नदैरुक्तं॥ तस्यप्रात्तेपैशा ॥५०॥
च्यस्व पितृणां च्युदस्यकत्वे पार्वणत्वादपराह्णव्यापिनी ग्राह्या॥ अज्ञातनामपि
शाचामुद्दश्यत्वेनकोद्दिष्टत्वामध्याह्नव्यापिनीति॥ कुलधर्मव्रतादौ तु तैरे

९

व॥ चैत्रनभोगतेनरसिंतास्याद्दर्चामितिदिकोक्ते॥ मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः। तदुक्तं स्कांदे सह्याद्रिखंडे॥ मार्गशीर्षे तथा मासि दत्तात्रेयो मुनिर्मले॥ मृगशीर्षयुते पौर्णमास्यां शस्यच्च वासरे॥ जनयामास देदीप्यमानं पुत्रं सती शुभं॥ तद्विष्णुमागतं ज्ञात्वा अत्री नामाकरोत्स्वयं॥ दत्तवान्स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरः॥ इति॥ इयं प्रदोषव्यापिनीति वृद्धाः॥ मार्गपौर्णमास्यां नंतराष्टमी अष्टका॥ एवं पौर्णमासंत्रेति॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमी अष्टका एकस्यां वत्याश्वलायनोक्तेश्च॥ एकस्यामष्टम्यां वैकाकार्येति हरदत्तः॥ कश्चित्संवत्सरमुक्ता प्रोष्ठपदाष्टकाम्नयः पितृलोके भविष्यसीति पाम्नवच्चनात्॥ तत्र वसप्तमीषु पर्वेद्युः तत्परनवमी

द्र

न्वष्टकासु च श्राद्धमुक्तं कालादर्शे॥ मार्गशीर्षे च पौषे च माघे पौषे च फा
ल्गुने॥ कृष्णपक्षेषु पूर्वेद्युरन्वष्टक्यं तथाष्टका इति॥ यत्तु विष्णुः॥ अमावास्या
स्त्वष्टकास्तिस्रोन्वष्टकाइति। यच्च कौर्मे॥ अमावास्याष्टकास्तिस्रः पौषमासादि
षु त्रिष्विति। यच्च तुर्थ्यो अनावस्य कथ्यार्थया वाप्ययाच्चतुर्थी स्यात्तां च कुर्या
त्प्रयत्नत इति॥ वायुब्रह्मांडपुराणात्॥ श्राद्धमेतद्यपि कुर्वाणो नरकं प्रतिप
द्यत इति विष्णुरिति शूलपाणिः॥ शाखाभेद व्यवस्थितिरिति च॥ वायुब्रह्मांडयोः॥
आद्योपरेपः सदा कार्यो मांसैरन्यास्सदा भवेत्॥ शाकैः कार्या तृतीया स्या
देवाद्द्र्व्यगतिविधिः॥ पौषादिक्रमः॥ अन्वष्टादि प्रागेव निर्णीता॥ तत्राष्ट
म्यपराह्णव्यापिनी ग्राह्या॥ अथाच्छादनपर्यंतं श्राद्धं पार्वणवन्नवैदिता
श्वलायनकारिकोक्तेरपराह्णकालत्वाच्च पार्वणस्य॥ पूर्वेद्युरन्वष्टकाश्राद्ध

॥५१॥

८

योऽस्तु अष्टम्यनुरोधेन निर्णयः॥ अथ वस्त्रं॥ पूर्वेद्युः पितृभ्यो दद्यात्॥ अप
रेद्युरन्वष्टक्यामिति च॥ अत्र कामकाले विश्वेदेवौ॥ इष्टिश्राद्धे क्रतुदक्षौ
वष्टम्यां कालकामाविति सायणीय गृह्यकारिकोक्तेः॥ अत्र श्राद्धीयकरणे प्रायश्चि
त्तसूक्ते रुग्विधाने॥ एनिद्युभिर्जपेन्मंत्रं शतवारं कृतं तद्दिने। अन्वष्टक्ययदा
श्वन्यं संप्रणीयादिति सर्वेषेति॥ अशक्तौ चाश्वलायनः॥ अथम्यो न्तेष्टकाः॥
पशुं वा स्थालीपाकं वानडुहे यवसमाहरेदग्निना वा कक्षमुपोषेदे
षा मेऽष्टकेति न त्वेवानष्टकः स्यादिति॥ मार्गशीर्षादिषु मलमासे सति तत्राष्ट
का न कार्यान्वितर्णामिति गृहणामित्युक्तं नारायणवृत्तौ॥ कौस्तुभेपि॥ म
हालयाष्टकाश्राद्धापाकमाघेपि कर्मवेत॥ स्पष्टमासविशेषास्यादिहितं व
र्जयेन्मलइति॥ ॥इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ मार्गशीर्षः॥

वन्तः संक्रमेपराः षोडश घटिकाः पुण्यकालः॥ अन्यत्प्राग्वत्॥ अत्रोत्सर्जन
निर्णयेसिंहे वक्तव्यो पुपाकर्मप्रसंगात्प्रागेवोक्तः॥ पौषशुक्लैकादशीम
न्वादिः सावोक्ता प्राक्॥ पौर्णिमानंतराः सप्तसप्तम्यष्टमी नवम्यो नवष्टका
ख्याः॥ प्रागुक्ताः॥ पौषामावास्यायामर्धोदययोगो विशेषः॥ तदुक्तंमदनरत्ने
महाभारते॥ अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयोः॥ अर्धोदयसविज्ञे
याकोटिसूर्यग्रहैः समइति॥ पुष्यमाघयोर्मध्यवर्तिनी पौषपौर्णिमाप्युत्त
रामावास्येत्यर्थइतिभट्टाः॥ पुष्यस्यमाघस्यवेत्यर्थउक्तोमदनरत्नेतन्न॥
हेमाद्रिविरोधात्॥ तत्रहिमाघएवोक्तः तथादिवैवयोगः॥ रात्रौयन्नतुरात्रौ
कंचनेति हेमाद्रौमदनरत्नेस्कांदे॥ माघामायांव्यतीपातेआदित्येविल्लद
वते॥ अर्धोदयंतदित्याहुः सहस्रार्कग्रहैः समा॥ तत्रैवमाघमासेहंत्यपदो

॥५२॥

१०३

पंचदश्यां रवेर्दिने॥ वैधृते वानुराधेण व्यतीपाते सुदुर्लभे॥ व्रतं कुर्याद्दि
ययग्रन्थयः॥ तत्रैव॥ ब्रह्माविष्णुमहेशानां सौवर्णी पलसंख्यया॥ प्रतिमास्त
प्रकर्तव्यास्तदर्धेन द्विजोत्तम॥ साग्रं शतत्रयं गौणो द्रोणानां तिलपर्वतः॥
कर्तव्यो पर्वतो विष्णुब्रह्मेणाः पर्वसंख्यया॥ शय्यात्रयं ततः कुर्यादुपस्कर
समन्वितं॥ तिलैर्हैमिं कृत्वा प्रतिमा दद्यादित्युक्तं स्कांदे॥ अर्धोदये तु संप्रा
प्ते सर्वं गंगासमं जलं॥ शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः॥ यत्कि
ञ्चिद्दीयते दानं तद्दानं मेरुसंनिभं॥ इति॥ अत्र दानविशेषा निर्णयामृते
स्कांदे॥ चतुःषष्टिपलं स्वर्णं अमंत्रं तत्र कारयेत्॥ चत्वारिंशत्पलं वाथ पं
चविंशतिरेव वा॥ अमंत्रे पात्रं॥ तच्च कांस्यमयमित्युक्तं॥ तत्रैव॥ एवं सुच

ष्टितं कार्यं कांस्यभाजनमुत्तममिति ॥ तथा ॥ निधाय पायसं तत्र पद्ममष्टदलं लि-
खेत् ॥ पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं ॥ तदभावे तदर्धं वा तदर्धं वापि
कारयेत् ॥ रूप्यं तु तंडुलैः शुद्धैः कृत्वाष्टदलमुत्तमं ॥ अमंत्रं स्थापयेत्तत्र ब्र-
ह्मविष्णुशिवात्मकं ॥ तेषां पूजां ततः कार्या श्वेतमाल्यैः स्रक्चंदनैः ॥ वस्त्रादि-
भिरलंकृत्य ब्राह्मणाय निवेदयेत् ॥ मंत्रस्तु ॥ सौवर्णपायसामत्रं यस्माद्
त्त्रयीमयं ॥ आपत्तेस्तारकं यस्मात्तद्गृहाण द्विजोत्तम ॥ ससुरं इमं खलं
पृथ्वीं सम्यग्दातुश्च यत्फलं ॥ तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तममिति ॥
इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ पौषः ॥ ॥ अथ माघस्नानं ॥ तत्र ॥ पद्मे
विष्णुः ॥ तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् ॥ हविष्यं ब्रह्मचर्यं
च माघस्नाने महाफलमिति ॥ सौरमास उक्तः ॥ ब्राह्मे तु सावन उक्तः ॥ प-

८

105

कादश्यां शुक्लपक्षे पौषमासे समारभेत ॥ द्वादश्यां पौर्णमायां वा शुक्लपक्षे
समापनमिति पाद्मे ॥ पुष्यस्यैकादशीं शुक्लामारभ्य स्थंडिलेशयः ॥ मास
मात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥ त्रिकालस्नानं यो हि कुर्यात्तच्छक्तो नाग ॥ जि
तेंद्रियः ॥ माघस्यैकादशीं शुक्लां यावद्विद्याधरात्तमेति ॥ त्रिकालस्नानं मासो
पवासविषयं ॥ निराहार इत्युक्तेः ॥ पृथ्वीचंद्रोदये त्वन्योक्तो विकल्प दर्शो वा
पौर्णमासी वा प्रारभ्य स्नानमाचरेत् ॥ पुण्यान्यहानि त्रिंशत्तु मकरस्थे दि
वाकर इति ॥ अत्र दर्शनमिति शुक्लादिमुख्य चांद्रादि निप्रायेण ॥ अयं
तु पक्षो नेदानीं प्रचरति ॥ अधिकारिणो न विष्ये ॥ ब्रह्मचारी गृहस्थो वा
वानप्रस्थोथ भिक्षुकः ॥ बालवृद्धयुवानश्च नरनारी नपुंसकाः ॥ स्ना
त्वा माघे शुभे तीर्थे प्राप्नुयादीप्सितं फलं ॥ पाद्मे ॥ सर्वेषामधिकारिणां ह्य

त्रविष्णुभक्तोथवान्नप॥ ब्राह्मे॥ उष्णोदकेन वा स्नानमशक्तौ सति कुर्वते॥
वृद्धेषु सर्वगात्रेषु उष्णोदन्नविशिष्यते॥ यदा तु माघो मलमासो भवति
तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्तव्याः॥
मासोपवासचांद्रायणादि तु मलमास एव समापयेत्॥ तदुक्तं दीपिका
यां॥ नियतं त्रिंशद्दिनत्वाच्छुनेर्मास्याधिकस्य समापयेत्॥ मलिने मासो
पवासव्रतमिति॥ स्नानारंभे च मंत्रो विष्णुक्तः॥ तत्र बौधायनिः संग्र
हीयाद्द्विविप्रवैके॥ माघमासमिमं पुण्यं स्नास्येहं देव माधव॥ तीर्थस्या
स्य जले नित्यमिति संकल्प्य चेतसि॥ इति प्रत्यहं मंत्रश्च पाद्मे॥ दुःखदारिद्र्यना ॥५८॥
शाय श्रीविष्णोस्तोषणाय च॥ स्नानं करोम्यघ साधमाघे पापविनाश
न॥ मकरस्थे रवौ माघे गोविंदाच्युत माधव॥ स्नानेनानेन मे देव यथोक्त

फलदो भव ॥ इमं मंत्रं समुच्चार्य स्नायान्मौनसमन्वित इति ॥ प्रत्यहं सूर्योर्घ्य
मंत्रश्च पृथ्वीचंद्रोदये पाद्मे ॥ सवित्रे प्रसवित्रे च परं धाम जले मम ॥ त्वत्तेज
सा परिभ्रष्टं पापं यातु सहस्रधेति ॥ स्नानकालश्च सूर्योदयः ॥ त्रिस्थलीसेतौ ॥
मकरस्थे रवौ यो हि न स्नात्यनुदिते रवाविति ॥ माघमासे दद्यात् पूः किंचि
दभ्युदिते रवाविति च वचनात् ॥ समाप्ते माघमासे तु तपस्वीजनवल्लभे ॥ नौ
रांति सर्ववारीणि समुद्गच्छति भास्करे ॥ धुनीमः सर्वपापानि त्रिविधानि न सं
शय इति नारदीयोक्तेः ॥ यो माघमास्युषसि सूर्यकरान्वितत्ये स्नानं समाच
रति चारुनदीप्रवाहे ॥ उद्धृत्य सप्तपुरुषान्पितृमातृवर्गात्स्वर्गं प्रयाति
मरदेहधरो नरोसौ ॥ इति भविष्योत्तरवचनाच्च ॥ ब्राह्मे त्वरुणोदयाच्च तत्केः ।
अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ॥ माघवांछियुन्गनस्यायन

108

यः स्नाति सुरपूजितमिति ॥ तथा ॥ अरुणोदयमारभ्य प्रातःकालावधिप्रभो ॥
माघस्नानं व्रतं पुण्यं क्रमात्तत्र धारणा ॥ उत्तमं तु सनक्षत्रं लुप्ततारं तु म
ध्यमं ॥ सवितर्युदिते भूप ततो हीनं प्रकीर्तितमिति च ॥ तेनात्र रात्र्युपपद
या व्यवस्था ॥ इदं च स्नानं प्रयागे तिप्रशस्तं ॥ काश्याः शतगुणाः प्रोक्ता गंगायं
मुनसंगमे ॥ सहस्रगुणिता सापि भवेत्पश्चिमवाहिनी ॥ पश्चिमाभिमुखी गं
गा कालिंद्या सह संगता ॥ हंति कल्पकृतं पापं समाघे चेन्नृपदुर्लभेत्यादि पाद्मे
वचनेभ्यः विस्तरस्तु पितामहकृतप्रयागशतोज्ञेयः ॥ ब्राह्मे यत्र कुत्रापि वा मा
घे प्रयागं स्मरणान्वितः ॥ करोति मज्जनं तीर्थे स लभेद्गंगमज्जनं ॥ तथा स ॥५५॥
मुद्र इति प्रशस्तं ॥ तदुक्तं स्कांदे चंद्रोदये प्रभासखंडे ॥ माघमासि च यः स्नाया
न्नैरंतर्येण मानवः ॥ पौंडरीकफलं तस्य दिवसे दिवसे भवेत् ॥ माघस्नानका

म्यमेवेतिमद्दाःविल्वा॥देवाक्येसदावश्यशक्षातनित्यत्वातवगतेनित्यकाम्यनि
तियुक्तं॥मासपर्यंतस्नानासंभवेतुत्र्यहंवास्नायात॥अस्मिन्योगेत्वशक्तौ
पिस्नायादपिदिनत्रयं॥प्रयागेमाघमासेतुत्र्यहंस्नातस्ययत्फलं॥नाश्वमे
धसहस्रेणतत्फलंलभतेभुवीत्यादिपाद्मादिवचनात॥अत्रमकरसंक्रम
स्यसप्तमीमाघीतित्र्यहमित्यके॥माघशुक्लदशमीदित्यन्ये॥एकादश्या
दइत्यपरे॥माघस्याद्यत्र्यहमितिकेचित॥त्रयोदश्यादितिबहवः॥महामा
घीपुरस्कृत्यसस्नातत्रिदिनत्रयमितिपाद्मोक्तेः॥एतस्यार्थवादत्वात॥यत्किं
चिदिनत्रयमितिमद्दाःतत्वेतुसंदिग्धएवाक्यशेषादितिन्यायात॥त्रयोद
श्याद्येवेति॥प्रयागविनापिपाद्मे॥अस्मिन्योगेत्वशक्तौपिस्नायादपिदिन
त्रयं॥माघस्नानेनियमास्तुनारदीये॥नवह्निसेवयेस्नातोह्यस्नोपिवरा॥

न्ने॥ होमार्थे सेवये द्विजैः शितार्थैन कवदाचनं॥ अहन्यहनि दातव्यातिलाः
शर्करयान्विता॥ त्रिभागस्तिलानां स्याच्चतुर्थः शर्करान्वितः॥ तथा॥ अन
न्यगी वराहरोहे सर्वमांसं नयेद्दिति॥ अप्रावृत्तवारी रस्तोयः कृष्टस्नान
माचरेत्॥ पदे पदेश्वमेधस्य फलं प्राप्नोति मानवः॥ तथा॥ शंखचक्रधरं
देवमाधवं नाम पूजयेत्॥ वह्निकुंडत्वविधाने न ततः स्वैकाशनो भवेत्॥
भूशाय्याब्रह्मचर्येण शान्तः स्नानं समाचरेत्॥ अशक्तो ब्रह्मचर्या
दौ स्वेच्छा सर्वत्र कथ्यते॥ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी॥
तिलभुक् तिलदाता च षडेते तिलाः पापनाशनाः इति॥ तथा प्रयागासंभवे ॥ ५६ ॥
कार्यं यादशाश्वमेधो तरस्त्रप्रयागतीर्थस्नानमुक्तं काशीखंडे॥ कास्यु
त्रवे प्रयागे यत्तपसी स्नाति मानवाः॥ दशाश्वमेधजनितं फलं तेषां न वैधव

मिति॥स्नानोत्तरं मदनपारिजाते विष्णुः॥काष्टमौनान्नमस्त्र यस्तजये तु रुषो
त्तमं॥अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः॥भविष्ये॥तैलमामलकां
श्चैव तीर्थे देयास्तु नित्यशः॥ततः प्रज्वालयेदग्निं सेवनार्थं द्विजन्मनां॥ए
वं स्नानावसाने तु भोज्यं देयमवारितं॥भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभू
षणैः॥कंबलाजिनरत्नानि वासांसि विविधानि च॥चोलकानि च देयानि
वासांसि विविधानि च॥चोलकानि च देयानि प्रच्छादनपटास्तथा॥उपान
हौ तथा गुप्तमोचकौ पापमोचकौ॥अनेन विधिना दद्यान्माधवः प्रियतामि
ति॥पाद्मे॥भस्मोपशायी न होतव्यमाज्यं तिलसमन्वितं॥तथा॥अन्नं वै वयथा
शक्त्या दद्यं माघे नराधिप॥सुवर्णरक्तिपात्रं च दद्याद्द्वदविदतया॥माघां
ते तु विशेषान्नारदीये॥माघावसाने षुभवोपद्भ संभोजनं स्मृतं॥स्त्रीम

१०००
६

112.

प्रीयतां देवो विष्णुमूर्तिर्निरंजनः ॥ दंपतेवींससीसरव्येमेसप्तधान्यं समन्वितो
त्रिंशत्तुमोदकादेया: शर्करातिलसंयुता इति ॥ अत्रैकादशीविधानेन व्रतस्यो
द्यापनं तत्र्ययतिपाद्मवचनात् ॥ एवं त्रिरूपवासपूजनादि कृत्वा परेऽह्नि तिल
चर्वाज्यैरष्टोत्तरशतं होमं कृत्वा सवित्रे प्रसवित्रे चेति एवं लोकमंत्रमुच्चार्य दि
वाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ॥ परिपूर्णं कुरुष्वेहमाघस्नानमुप
पते इति क्षमापयेदिति संक्षेपः ॥ मकरसंक्रांतौ हेमाद्रिमते परतश्चत्वारिं
शत्घटिकाः पुण्यकालः ॥ त्रिंशत्कर्कोटके नाड्यो मकरे तु दशाधिके इति
ब्रह्मवैवर्तात् ॥ माधवमते तु पराविंशति: ॥ त्रिंशत्कर्कटके पूर्वा मकरे विं ॥ ५७ ॥
शतिः परेति वृद्धवसिष्ठोक्तेः ॥ यदा तु सूर्योदयात्प्राग्वै संक्रांतिर्भवति तदा
नयमते पूर्वमेव पुण्यकालः ॥ रात्रौ तु प्रदोषनिशीथयोर्वा मकरसंक्रमे माघे

वमते द्वितीयदिने पूर्वपुण्यं॥ यद्यस्तमयवेलायां मकरं याति भास्करः॥ प्रदो
षे वार्द्धरात्रे वा स्नानं दानं परेहनीति वृद्धगार्ग्यवचनात्॥ अस्तमयप्रदोषः॥
प्रदोषपूर्वे रात्रे इति हेमाद्रिः॥ कार्मुकं तु परित्यज्य झषसंक्रमते रविः॥ प्रदो
षे वार्द्धरात्रे वा स्नानं दानं परेहनीति भविष्योक्तेश्च॥ कालादर्शनिर्णयामृ
तमदनपारिजातादयोऽप्येवमाहुः॥ चत्वारिंशद्घटीनां विभागेन पूर्वा विं
शतिः पुण्यः विंशतिः परा॥ तत्र तारतम्यव्यवहारेण पुण्यकालस्य निर्णीयव्या
प्यत्वात् स्नानदानादीनामभावः तस्मात् पूर्वा ग्राह्या॥ दाक्षिणात्याश्चैतदेवाद्रि
यंते॥ यत्तु हेमाद्रिणा॥ द्योवा शब्दो यथार्थो द्वितीयस्तथार्थो॥ यथा प्रदोषपूर्वे
वस्तथार्धरात्रे परेह्नि युक्तं॥ तस्मै नमोऽस्तु॥ तेन परेह्नि पुण्यवक्तुं प्रदोष
इति दिनद्वयपुण्यनिरासार्थं॥ अर्धरात्रग्रहणं हेमाद्रिस्मृत्यर्थसार॥

नंतस्नद्दादिमतेतुनिशीथात्पूर्वेपश्चाच्चसंक्रांतौपूर्वेदिनेपरदिनेवापु
ण्यं॥धनुर्मीनाच्वतिक्रम्यकन्यांचमिथुनंतथा॥पूर्वापरविभागेनरात्रौ
संक्रमणंयदा॥दिनांतेपंचनाड्यस्तुतदापुण्यतमास्मृता॥उदयेपितथा
पंचदैवेपित्र्येचकर्मणीतिस्कांदवचनात्॥पूर्वापरविभागेनेतिमकरक
र्कटभिन्नविषयं।पूर्वोक्तवचोविरोधादितिमदनरत्नेउक्तं॥षडशीतिमु
खतीतेऽप्रतीतेचोत्तरायणे॥इत्यादिविरोधश्चेतितन्न।निर्देशावैयर्थ्या
पत्तेः।तेनपरेह्निपुण्यंपिपुण्यमितिगाथार्थमिदं।अनंतभट्टोपि॥अथ
निशीथात्प्राग्यदाभवेत्॥अयनंतुविषुवंतत्रप्राग्दिनांतिमनाडिकाः॥५८॥
पंचपुण्यतमाःपश्चान्निशीथाच्चेद्भवेत्तदा॥आद्याःपरदिनेस्यातद्वदि
त्येषनिर्णयइति॥अपरार्केप्येवं॥अस्तंगतेयदासूर्येझषंयातिदिवाक

८

रः॥ प्रदोषे वार्द्धरात्रे वा तदा पुण्यं दिनद्वयमिति बौधायनवचनात्॥ दिनद्वयं वा पुण्यकालः॥ तदा पुण्यं दिनांतरमिति मदनरत्ने पाठः॥ गुर्जरप्राच्यौदीच्या
स्त्विदमेवाद्रियंतेति थितत्वादिगौडग्रंथास्तु॥ प्रदोषार्द्धरात्रभिन्ने रात्रेः प
विभागे परभागे च परदिने पुण्यमन्यसंक्रांतिवत्॥ विशिष्य तयोर्निर्देशा
त्। प्रदोषश्च॥ प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति वत्सोक्तेरित्या
हुः॥ तन्न॥ अस्तंगते इति तृतीयैव यथ्यीपत्तेः अत प्रदोषपदेन तद्भिन्नैव रा
त्रिमुच्यते। अत एव चन्द्रोदयतेर्रविरीति वृद्धगार्ग्यादिभिः॥ दक्षिणायने स
र्वैत्र रात्रौ संक्रमे पूर्वदिनमुक्तं। वत्सो हिरण्ययनादिपराइत्युक्तेश्रिमद्वृ
तिएव प्रदोष॥ मकरे दानविशेषो हेमाद्रौ स्कांदे॥ धेनुं तीलमयीं राज्यंद

१

याघश्चोत्तरायणे॥सर्वान्कामानवाप्नोतिविंदतेपरमंसुखं॥विष्णुधर्मेपि॥
उत्तरस्त्वयने विप्रावस्त्रदानंमहाफलं॥तिलपूर्णमनड्वाहंदत्वारोगैःप्रमु
च्यते॥इति॥शिवरहस्येपि॥तस्यांकृष्णतिलस्नानंकार्यंचोद्वर्तनंशुभे॥ति
लोदयाश्चविप्रेभ्यःसर्वदेवोत्तरायणे॥तिलतैलेनदीपाश्चदेयाशिवगृहे
शुभाः॥तमकरेरात्राविपिश्राद्धादिनवतीत्युक्तंप्राक्॥माघायायां॥विशेषो
र्ध्वोदयः॥प्रागेवोक्तः॥माघकृष्णचतुर्दश्यांयमतर्पणमुक्तंहेमाद्रौयमुन॥
यनकोंभ्युदितेकालेमाघकृष्णचतुर्दशी॥स्नातःसंतर्पयेदयमंसर्वपा॥
पैःप्रमुच्यतइति॥माघशुक्लचतुर्थीतिलचतुर्थी॥साप्रदोषव्यापिनी॥
ग्राह्या॥माघशुक्लचतुर्थ्यांतुतस्मिन्कालेसमाहितः॥नक्तव्रतपरायण॥

यत्वा ढुंढं चेयिष्यंतिते व्यास्युः रस्मुरडुहामिति। काशीखंडात्॥ माघमा
सचतुर्थ्यांतु तस्मिन्काले उपोषितः। अर्चयित्वा तु यो देवी जागरं तत्र का
रयेदिति। त्रिस्थली सेतौ लौगाक्षिः॥ इयमेव कुंदचतुर्थी। सा प्रदोषव्या
पिनी ग्राह्या॥ माघस्य शुक्लचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं॥ संपूज्य या
हिता काशी संप्राप्नोति श्रियं नर इति कालादर्शे कौर्मोक्तेः। माघशु
क्लपंचमी श्रीपंचमी॥ तदुक्तं हेमाद्रौ वाराहे॥ माघस्य शुक्लचतुर्थ्यां तु व
रमाप्य च श्रियः। पंचम्यां कुंदकुसुमैः पूजां कुर्यात् समृद्धये॥ इयं माघ
व मत एव हेमाद्रिमते परा॥ माघशुक्लसप्तमी रथसप्तमी॥ साऽरुणोद
यव्यापिनी ग्राह्या॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी॥ अरुणो

दयवेलायां तस्यां स्नानं महाफलमिति। विष्णुवचनात्॥ अरुणोदय
वेलायां शुक्ला माघस्य सप्तमी॥ प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः सम
ति वचनाच्च॥ यत्तु दिवोदासीये॥ अचला सप्तमी दुर्गा शिवरात्रि महा
भरः॥ द्वादशी वत्स पूजायां सुखदा प्राग्युदा स्मृता इति षष्ठियुतत्वमुक्तं
तत्पदा पूर्वेद्युः घटिका द्वयं षष्ठी सप्तमी च परेद्युः क्षयवशादरुणो
दयात्पूर्वं समाप्यते तत्परं ज्ञेयं तत्र षष्ठ्यां सप्तम्यां क्षयं प्रवेक्ष्यारुणो
दयस्नानं कार्यं॥ मदनरत्ने भविष्योत्तरे॥ माघे मासि सितपक्षे सप्त ॥ द्वि०॥
मी कोटिभास्करा। कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः॥ एक
स्मिन्रविवारे स्नानकृतं तत्र कोटिगुणं भवतीत्यर्थः॥ अत्र विधि वर्ण

विघ्ने॥कृत्वाषष्ठ्यामेकभक्तंसप्तम्यानिश्चलंजलं॥राज्यंतेवाल्येप्यास्त्वंद
त्वाग्निरसिदीपकौ॥नौस्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत्॥नमस्तेरुद्र×
×रूपायरसानांपतयेनमः॥×तयोजलंप्रक्रम्यानकेनत्वाल्पुतेयायता
वस्नानंसमाचरेत्॥सौवर्णेराजतेपात्रेमृन्मयेलाबुमयेतथा॥तैलेन
वर्तिदातव्यामहारजनरंजिता॥महारजनंकुसुंभं॥समाहितमना
भूत्वादत्त्वाग्निरसिदीपके॥ॐरुद्रायनमस्तुभ्यंद्वारवासिनमो
स्तुते॥जलंपरिहरेदीपंध्यायंतप्यदेवताइति॥स्नानमंत्रश्चकारीखं
ड॥यद्यज्जन्मकृतंपापंमयाजन्मसुसप्तसु॥तन्मेरोगंचशोकंचमाकरी
हंतुसप्तमी॥एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितं॥मनोवाकायजं

८

यच्च ज्ञाताज्ञातं ये पुनः ॥ एतेस्सप्तविधं पापं स्नानान्मे सप्तसप्तिके ॥ सप्तव्याधि
समायुक्तं हर माकरि सप्तमी ॥ एतन्मे त्रत्रयं जन्म्या स्नात्वा पादोदके नरः केर
वादित्यमालोक्य दाणा त्रि कूमशो भवेत् ॥ दिवोदासीयं मदनरत्ने च ॥ इन्दु
दंडं तलं चालयित्वा सप्ताकेपत्राणि बदरीपत्राणि च शिरसि धाय प्रवी
कर्मैत्रैस्नात्वा तिलपिष्टमया पूपे हैमं सूर्यं प्रत्यविप्राय दद्यात ॥ अर्घ्यमं
त्रो मदनरत्ने ॥ सप्तसप्ती वह प्रीत सप्तलोकप्रदीपन ॥ सप्तमी सहितो देवग
हाणार्घ्यं दिवाकर ॥ ततः ॥ जननी सर्वलोकानां सप्तमी सप्तसप्तिके ॥ सप्त
व्याहृतिके देवी नमस्ते सूर्यमंडले इति प्रार्थयेत् ॥ अत्र दान विशेषा मदन ॥ दि ७ ॥
रत्ने भविष्ये ॥ ताम्रपात्रे यथाशक्त्या मृन्मये नाथ भक्तिमान् ॥ स्थापयेत्ति
लपिष्टं च सघृतं सगुडं तथा ॥ कांचनं तालकं कृत्वा अरक्ता स्तिलपिष्टजं ॥

संछादय रक्तवस्त्रेण पुष्पैर्धूपैस्तथार्चयेत्॥ दानमंत्रस्तु॥ आदित्यस्य प्रसादेन प्रातःस्नानफलेन च॥ दुष्टदौर्भाग्यदुष्टघ्नं मया दत्तं तु तालकं॥ तालकं कर्णभरणं। तत्रैव भविष्योत्तरे॥ एवं विधेरथवरं रथिवाजियुक्तं हैमं च हैमरातविधिना समेतं दद्याच्च माघसितसप्तमि वासरे यः सोमंगचक्रगतिरेव महीं भुनक्ति॥ इयं मन्वादिरपि॥ इयं च स्कंदपुराणे रथसप्तमी इति प्रोक्ता। दामा। यामलमासो भवति तदा मासद्वयं मन्वादिश्राद्धं कुर्यात्॥ मन्वादिके तिथिके च कुर्यान्मासद्वयेपि चेति॥ स्मृतिचंद्रिकायां॥ माघशुक्लाष्टमी भीष्माष्टमी॥ तदुक्तं हेमाद्रौ पाद्मे॥ माघमासि सिताष्टम्यां सतिलं भीष्मतर्पणं॥ श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति॥ भारतेपि॥ शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलं॥ संवत्सरकृतं पापं तत्क्षणादेव नश्यतीति॥ वबलनिबंधे स्मृ

तिः॥ अष्टम्यांतु सितेपक्षे भीष्मायतु तिलोदकं॥ अन्नंचविविधंदद्युःसर्वे
वर्णाद्विजातयः॥ सर्ववर्णाःके द्विजातय इतिसंबोधनं॥ तर्पणमंत्रस्तत्रैव॥
भीष्मःशांतनवोवीरसत्यवादीजितेंद्रियः॥ आभिरद्भिरवाप्नोतु पुत्रपौ
त्रोचितांक्रियां॥ वैय्याघ्रपादगोत्रायसांकृत्यप्रवरायच॥ अपुत्रायददा
म्येतज्जलंभीष्मायवर्मिणे॥ वसुनामवतारायशंतनोरात्मजायच॥ अर्घ्यं
ददामिभीष्मायआबालब्रह्मचारिणे॥ इति॥ एतच्चजीवत्पितृकस्यापि
भवति॥ जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरितिपाद्मोक्तेरितिजी
वत्पितृकनिर्णयेपितृस्वरणोक्तेः॥ एतच्चापसव्येनकार्यमितिदिवोदासी
ये॥ अत्रश्राद्धंकाम्यंतर्पणंतुनित्यं॥ ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मा
यतोजलं॥ संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेतिमदनरत्नेवचनात्॥

॥हरि॥

८

माघस्शुक्लद्वादशीभीष्मद्वादशी॥त्वयाकृतमिदं वीरनवनाम्नाभविष्यती॥सा
भीमद्वादशीह्येषासर्वपापहराश्रुभेति॥हेमाद्रौपाद्मवचनात॥इयमेवयु
तायुग्मवाक्यात॥माघीपूर्णिमापरेत्युक्तं प्राक्॥तथाहेमाद्रौपाद्मे॥मघास्कं
योश्चजीवेंद्वौमेहामाघीतिकथ्यते॥तत्रैवज्योतिषे॥मेषपृष्ठययासौरिःसी
हेचगुरुचंद्रमा॥भास्करःश्रवणेदेविमहामाघीतिसास्मृता॥तथाभविष्ये॥
वैशाखीकार्तिकीमाघीतिथयातीवसत्तमाः॥स्नानदानविहीनास्ताननेयाः
पांडुनंदन॥तथा॥तिलपात्राणिदेयानिकंचुकाःकंबलास्तथेति॥माघपौ
र्णिमानंतराष्टमीमाघीअष्टकातन्निर्णयः॥पूर्वंपूर्वमष्टकानिर्णयोम
लमासेचैतानभवतीत्येतत्सर्वंमार्गशीर्षप्रकरणेतिहितं॥तथाचतत्स्य
ष्टकास्वराकाविर्यमावस्यकीहेमंतशिशिरयोश्चतुर्णामपरपक्षाणाम

पूर्जिताः५

यदा४

११००
९ २
१०

८

ष्टमी षष्टकापकस्यां वेत्याश्वलायनोक्तेः॥ तथा माघाष्टकां प्रक्रम्य तामेकाष्ट
केत्यापस्तंबवचनाच्चेत्यादि प्रयोगपारिजाते स्फुटं ज्ञेयं॥ कुंभे पूर्वाः षोडशाष्ट
टिकाः पुण्याः शेषप्राग्वत्॥ ॥ इति श्री कमलाकरकृते माघः समाप्तः॥ ॥ फाल्गुन
कृष्णचतुर्दशी शिवरात्रिः। सा च केषुचिद्वचनेषु प्रदोषव्यापिनी ग्राह्येत्युक्तं॥
केषुचिन्निशीथव्यापिनी॥ तत्राद्या माधवीये वायवीये॥ त्रयोदश्यस्तगे सूर्ये च
तसृष्वेव नाडिषु॥ भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्॥ स्मृत्यंतरेपि॥
प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी॥ रात्रौ जागरणं यस्मात्तस्मात्तां स
मुपोषयेत्॥ अत्र प्रदोषो रात्रिः उत्तरार्द्धे तस्या हेतुत्वोक्तेः॥ कामिकेपि॥ आदि ॥द्वि॥
त्यास्तमये काले अस्ति चेद्या चतुर्दशी॥ तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्त
मोत्तमेति॥ द्वितीयापि तत्रैव नारदसंहितायां॥ अर्धरात्रयुता यत्र माघकृष्ण

८

न्निावरात्रि व्रतं तत्रसोऽश्वमेधफलं लभेत॥ स्मृत्यंतरेपि भवेद्यत्र त्रयोदश्यां भूतव्या
प्ताम्हानिशि॥ १

चतुर्दशी॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति॥ ईशानसंहितायां॥ माघकृ
ष्णचतुर्दश्यामादिदेवो महानिशि॥ शिवलिंगतयोद्भूत कोटिसूर्यसमप्रभः॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिरिति॥ एवं सति पूर्वेद्युरेवोभयव्या
प्तौ पूर्वैव॥ त्रयोदशी यदा देवी दिनभुक्तिप्रमाणतः॥ जागरे शिवरात्रिः स्यान्निशि
पूर्णा चतुर्दशी॥ इति स्कांदोक्तेः॥ दिनभुक्तिरस्तमयः॥ जयंती शिवरात्रिश्च कार्ये भद्रा
जयान्वितेति स्कांदाच्च॥ दिनद्वये निशीथ व्याप्तौ तु हेमाद्रिमते पूर्वैव अर्धरात्रा
त्पुरस्ताच्चेज्जयायोगो यदा भवेत्॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियै
रिति॥ पाद्मवचनात्॥ मदनरत्ने प्येवं॥ निर्णयामृते तु सर्वापि शिवरात्रिः प्र
दोषव्यापिन्येव अर्धरात्रवाक्यानि कैमुतिकन्यायेन प्रदोषस्तावकीनीत्यु
क्तं॥ परदिने प्रदोषनिशीथोभयव्याप्तिसत्वा परैवेति तु माधवः॥ इदमेव

126

युक्तः प्रतिमः॥ पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्येत्येकैकव्याप्तौ तु पूर्वैव॥ जया
योगस्य प्राशस्त्यात्॥ तत्रोक्तं नागरखंडे॥ माघफाल्गुनयोर्मध्ये असिता
या चतुर्दशी अनंगेन समायुक्ता कर्तव्या सा सदा तिथिरिति॥ पाद्मे॥ अर्धरा
त्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिव
प्रियैरिति॥ स्कांदेपि॥ भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशि॥ शिवरात्रि
व्रतं तत्र कुर्याज्जागरणं तथेति॥ महतामपि पापानां दृष्ट्वा वै निष्कृतिः पुरा
न दृष्ट्वा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवां मितिस्कांदे दर्शयोगस्य निं
दितत्वाच्च॥ यदा चतुर्दशी पूर्वे निशीथादूर्ध्वं प्रवृत्ता परेद्युश्च निशीथा

॥ ९८॥

दर्वाग्गेव समाप्ता तदा परेद्युरेकव्याप्तिसत्वात्परैव॥ माधवस्तु सितेतर्दिन
द्विराजनु पतियागं यदि पंचदस्या॥ जया प्रयुक्तां न तु जातु कुर्याच्छिवस्य रा

त्रिं प्रियकृच्छिवस्येति वचनात्॥ एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्या
प्तिसत्वात्पूर्वैव॥ तेन दिनद्वये निशीथव्याप्तौ प्रदोषव्याप्त्या निर्णयः॥ दि
नद्वये प्रदोषव्याप्तौ निशीथेन निर्णयः। एकैकव्याप्तौ तु निशीथे निर्णय इ
ति। इयं च रविभौमसोमवारेषु शिवयोगे चाति प्रशस्ता॥ शिवरात्रिपा
रणे तु विरुद्धवाक्यानि दृश्यते॥ स्कांदे॥ कृष्णाष्टमी स्कंदषष्ठी शिवरा
त्रि चतुर्दशी॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति॥ जन्माष्ट
मी रोहिणी च शिवरात्रिस्तथैव च॥ पूर्वविद्धैव कर्तव्या तिथिभांते च पार
णमिति॥ तिथिमध्येपि पारणं स्कांदे उक्तं॥ उपोषणं चतुर्दश्यां चतुर्दश्यां
तु पारणं॥ कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा॥ ब्रह्मांडोदरमध्ये तु

प्यानि तीर्थानि संति वै ॥ संस्नाता निम्नवंती हन्त्रूतायां पारणे कृते ॥ तिथि नामेव स
र्वासामुपवासव्रतादिषु ॥ तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति ॥ याम
त्रयादर्वाक् ॥ चतुर्दशी समाप्तौ तदंते तदूर्ध्वगामिन्यां तु प्रातस्तिथिमध्ये ॥ एवं हे
माद्रिमाधवादयो व्यवस्थामाहुः तन्न ॥ तिथ्यंते तिथिभांते वा पारणं यत्र चोदितं ॥
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा इत्यादिसामान्यवचनैरेव व्यवस्था
सिद्धेरुभयविधवाक्यवैयर्थ्यस्य दुष्परिहारत्वात् ॥ वयं तु तिथ्यंते पारणं भवे
दिति कृष्णाष्टम्यादिविषयमेव न तु शिवरात्रिविषयं ॥ तदुपादानं तु पूर्व ॥ दिप ॥
त्रमात्रकथनार्थं ॥ कथमन्यथा स्कांदे एव स्कन्यहृदय एव वाक्यवत्तिथि
मध्ये पारणा विधानं घटते ॥ तस्माद्विना शिवचतुर्दशीमिति पर्युदस्तत्रि

129

वरात्र्याः शिवप्रकारेषु तिमध्य एव पारणेति ब्रूमः॥ शिष्टाचारोप्येवमेव। दी
पिकायां तु रात्रावपि तिथ्यंते पारणोक्तं॥ व्रततिथ्यंते तु निशीथेपि वाप्नोयादिति॥
मदनरत्नकालादर्शयोस्तु साद्यस्तमयपर्यंतं व्यापिनी चेत्परेहनि॥ दिवै
वपारणां कुर्यात्पारणेनैव दोषभागित्युक्तं॥ इदं च व्रतं संयोगपृथक्त्वन्याये
न नित्यमुक्तं काम्यं च॥ तथा च माधवीये स्कांदे॥ परात्परतरं नास्ति शिवरात्रि
परात्परं॥ न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं॥ जंतुर्जन्मसहस्रेषु भ्रम
ते नात्र संशयः॥ इति॥ अकरणे प्रत्यवायश्रुतेः॥ अर्णवो यदि वा शुष्येत्क्षी
यते हिमवानपि॥ चलंत्येते कदाचिद्वै निश्चलं हि शिवव्रतमिति क्वचनाख्य॥
नित्यता॥ मम भक्त्या भक्तो यो देवी शिवरात्रिमुपोषकः॥ गणाश्च मत्समं दिव्यम

दंतदनुकल्पत्वादशक्तपरं ॥ माघेतरप्रतीमासशिवरात्रिस्तु शिवरात्रि
शब्दस्य माघकृष्णचतुर्दश्यामेव रूढत्वात् माघस्य शेषेया प्रथमा फा
ल्गुनस्य च ॥ कृष्णचतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति हेमाद्रौ वचना
त् ॥ नायं निर्णयस्तत्रैति रात्रौ यामचतुष्टय पूजाविधानाद्यस्मिन्दिने धि
कारात्रिव्याप्तिः साग्राह्या साम्यतु पूर्वैवेती हेमाद्रिरुचिवान् ॥ वस्तुतस्तु प्र
तिमासकृष्णचतुर्दश्यामपि शिवरात्रिशब्दप्रयोगात् ॥ कौंडपायनाग्नि
होत्रनैत्यकाग्निहोत्रधर्मा इव तद्धर्मप्राप्तिः स्यादेव ॥ अतः प्रदोषनिशीथोभ
यव्याप्त्यैव निर्णय इति यथं प्रतीमः ॥ मदनरत्नेप्येवं ॥ अस्यारंभस्तत्रैव स्कां
दे । आदौ मार्गशिरमासि दीपोत्सवदिनेपि वा ॥ गृह्णीयान्माघमासे वा द्वाद

दं

दशे वस्तुपोषयेत्॥ तथा॥ एवं द्वादशवर्षेषु द्वादशैवतपोधनः॥ वरयेदितिशेषः॥
चतुर्दशी [illegible] शोवाविप्रानाचार्यंचवृथा॥ कुंभो परिन्यसेदेवं कुम्भयासहितो शि
वं॥ सौवर्णाप्यथवारोप्ये वृषभे संस्थितं शुभे इत्युक्तां हेमीमूर्तिं संपूज्य दीपो
त्सवमथासाद्य कृष्णायां च चतुर्दशी॥ द्वादशस्वपिमासेषु प्रकुर्यादितजा
गरं॥ माघामावास्यायुगादि॥ तदुक्तं॥ माघेमासेत्वमावास्येति। अन्यस्याङ्ग
तयान्यो विशेषो विष्णुपुराणे॥ माघासितपंचदशी कदाचिद्दुपैति योगं यदि
दिवारुणेन॥ अक्षेणकालः सपरः पितॄणां नह्यल्पपुण्यैर्नृपलभ्यते ॥ दिः७॥
॥ ना
सावितिः॥ वारुणं शतभिषा॥ इदं च कुंभादियैर्ज्ञेयमिति हेमाद्रिः॥ ना
रते॥ कालेधनिष्ठा यदि नाम तस्मिन् भवंति भूपालतदापितृभ्यः॥ दत्तं तिला

दं४

च्चंप्रददातितृप्तिंवर्षायुतंतत्कुलजैर्मनुष्यैरिति॥फाल्गुनीपौर्णमासीहोलि
कासायाह्नव्यापिनीग्राह्या॥सायाह्नेहोलिकांकुर्यात्सर्वोत्क्रीडनंगवामि
तिनिर्णयामृते॥उक्तं॥ज्योतिर्निबंधेतु॥प्रतिपद्भूतभद्रासुयार्चिताहोलिका
दिवा॥संवत्सरंचतद्राष्ट्रंपुरंदहतिसाद्भुतं॥प्रदोषव्यापिनीग्राह्यापौर्णिमा
फाल्गुनीसदा॥तस्यांभद्रामुखंत्यक्त्वापूज्याहोलिनिशामुखेइति॥नारदव
चनात्॥प्रदोषव्यापिनीत्युक्तं॥हेमाद्रौमदनरत्नेभविष्ये॥अस्यांनिशागमे
पार्थसंरक्षाःशिशवोगृहे॥गोमयेनोपलिप्तेचसचतुष्केगृहांगणे॥इत्या
दितत्रैवतद्विधानाच्च॥तेनेयंपूर्वविद्धा॥श्रावणीदुर्गानवमीदूर्वाचैवहुताश
नी॥पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमिति॥बृहद्यमब्रह्मवैवर्तो

ध्य॥ दिनद्वये प्रदोषव्याप्तौ परैव॥ पूर्वदिने भद्रासत्वात् तत्र च होलिका निषे-
धात्॥ तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये॥ भद्रायां दीपिता हो-
ली राष्ट्रभंगं करोति वै॥ नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत्॥ तथा॥ भ-
द्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतिं हन्ति ग्रामं दहति
फाल्गुनी॥ तथा॥ दिनार्द्धात्परतोपि स्यात्फाल्गुनी पौर्णिमा यदि॥ रात्रौ भद्रावसा-
ने तु होलिका दीप्यते तदेति॥ तदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी प-
रदिने च पूर्णिमा दलयवशात्सायाह्नात्प्रागेव समाप्यते तदा पूर्वदिने संपूर्णा ॥ दिन॥
रात्रौ भद्रासत्वात्तत्र तन्निषेधात्परेहनि प्रतिपद्येव कुर्यात्॥ सार्द्धयामत्र-
यं वास्यात् द्वितीयदिवसे यदा॥ प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृतेति॥ अ

134

भविष्यवचनादितिनिर्णयामृतकारः॥ मदनरत्नेप्येवं॥ यत्तु वह्नौ वह्निं परि
त्यजेतिदिभविष्ये। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः॥ तदुक्तं भिन्न
विषयमितितत्रैवोक्तं। अन्ये तु तस्यां भद्रामुखं त्यक्त्वेति॥ प्रदोषव्यापिनी
नस्याद्यदापूर्वदिनेतदा॥ भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनमि
ति॥ नारदवचनात्॥ निशागमे प्रपूज्येत होलिका सर्वदा बुधैः॥ न दिवा प्र
ज्वालयेद्ढुंढां पूजिता दुःखदा भवेदिति दिवोदासीयवचनात्॥ याम त्रयोर्ध्वं
मुक्त्वा चेत्प्रतिपत्तु न वेत्तिथिः॥ भद्रामुखं परित्यज्य कार्यो होला मनीषिभि
रितिविद्याविनोदनिबन्धात्॥ भद्रामुखं विहाय पूर्वदिन एव कार्येत्याद्युः॥
भद्रामुखं तु॥ नाद्याः पंचवदनं कलत्रास्तयेकेतिरत्नमालोक्तं ज्ञेयं॥ शिष्टा

१३

135

त्वारोप्यैवमेव ॥ अत्रेदं चंद्रग्रहणं तदा ततो वीडि॰ शीघ्र भद्रावर्जे पौर्णमास्यां हो
लिकादीपनं ॥ अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्जे रात्रि चतुर्थयामे
मेविष्टिपुच्छेवाहोलीकार्या ॥ ग्रहोत्तरं प्रतिपच्चात्पूर्वेद्युर्वा दिवा होला निषेधा
दितिदिवोदासस्वंद्रप्रकाशे ॥ वस्तुतस्तु परदिने प्रदोषपौर्णमास्यां सर्व
कर्मकालस्पर्शे चतुर्थयामादि गौणकाल ग्रहणमानाभावाद्भद्रावा
श्वग्रहणकाले पूर्व होला कार्या ॥ न च सर्वेषामेव वर्णानां सूतकेराङ्क
दर्शणे ॥ स्नात्वा कर्माणि कुर्वीत सूतमन्नं विवर्जयेदिति निषेधा क
थं सूतके होलिकेति वाच्यं ॥ तस्या नराद्यै दोषत्वात् ॥ प्र जाम्रं त्रसस्तु ॥
अथास्य कृपायसंत्रस्तैः कृत्वा त्वं होलि बालिशैः ॥ अतस्त्वां पूजयिष्या

॥ हो॰

७

मिश्रतेत्रतिप्रदाप्रवेति॥ कृतानानीमलमासेनभवति॥ इयंमन्वादिरपि
सातुपूर्वाह्निकीग्राह्या॥ मलमासेसतिमन्वादिश्राद्धंमासद्वये कार्य
मित्युक्तंप्राक्॥ चैत्रेशुक्लप्रतिपदिवसंतोत्सवः॥ साचौदयिकीग्राह्या॥
प्रवृत्तेमधुमासेतुप्रतिपद्युदितेरवावितिभविष्योक्तेः॥ दिनद्वयेतथा
तव्यापूर्वाचा॥ वत्सरादौवसंतादौबलिराज्येतथैवच॥ पूर्वविद्धैवक
र्तव्याप्रतिपत्सर्वदाबुधैरितिवृद्धवसिष्ठवचनात्॥ अत्रविशेषोहे
माद्रौभविष्ये॥ चैत्रमासिमहाबाहोपुण्यंतुप्रतिपद्दिने॥ यस्तत्रश्व
पचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः॥ नतस्यदुरितंकिंचिन्नाधयोव्याध

137

यान्रूपेति॥ तथा॥ प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ॥ कृत्वा चावश्यका
र्याणि संतर्प्य पितृदेवताः॥ वंदयेद्धोलिकाभूतिं सर्वदुःखोपशांतये॥ मं
त्रश्च॥ वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च॥ अतस्त्वं पाहि नो दे
वी भूते भूतिप्रदा भवेति॥ अथ चूतकुसुमप्राशनमुक्तं तत्रैव पुराण
समुच्चये॥ वृत्ते तुषारसमये सीतपंचदश्यां प्रातर्वसंतसमये समु
पस्थिते च॥ संप्राश्य चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोऽथ स
मासुखी स्यात्॥ मंत्रस्तु॥ चूतमग्र्यं वसंतस्य माकंदकुसुमं तव॥ स॥ ७०
चंदनं पिबाम्यद्य सर्वकामार्थसिद्धये इति॥ चैत्रामावास्या मन्वा
दिः॥ सायाह्नव्यापिनी ग्राह्या॥ द्व्यल्पपक्षे चात्र॥ ॥इति फाल्गुनः॥१॥

एवंनिरूपितमिदंगहनंतुकालंतत्त्वंविचार्यवचनैश्चनयैश्चसम्य
कु॥तद्दोषदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मि
तेषु॥मायासदापदीहगदितंमंदमतिना॥किमतच्छकचवाच्यव
सितुमपिस्वल्पमतिना॥तदेवंयत्किंचिद्गदितमिहविख्यातमहिमा
प्रतापोयंसर्वोविकसतितुपित्रोश्चरणयोः॥१॥योमोदततत्रगहना
र्णवकर्णधारःशास्त्रान्तरेषुनिखिलेष्वपिमर्मनेत्ता॥यात्रश्रमः
किलकृतंकमलाकरेणप्रीतिमनास्तुसरस्वतीबुधरामकृष्णः॥
॥इतिश्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टसुतदिनक

रभट्टात्मजभट्टकमलाकरकृते निर्णयसिंधौ संवत्सरकृत्य
निरूपणं नाम द्वितीयः परिच्छेदः समाप्तः॥ ॥छ॥ संख्या॥
॥४५००॥ श्री॥छ॥ श्री॥छ॥ श्री॥छ॥ स्वस्ति श्री नृप शालिवा
हनशके १५८२ शार्वरीनामसंवत्सरे उदगयने ग्रीष्मऋतौ
अधिकमासे शुक्लपक्षे त्रयोदश्यां मंदवासरे तद्दिने इदं
पुस्तकं राघभट्टेनेदं पुस्तकं निर्णयसिंधौ आत्मकार्या
र्थं परोपकारार्थं च लिखनमेव समापनीयं॥ श्री॥ ॥छ॥

उपोपनय
नं निर्णय ३०२
वि धानस्य ३०५८
सम व्रतेन ३०८
वि वा हको ३०८
पाव तोद्धुप
नृ मि निर्णि क०१०
सौ आ का ळ ३१४
प वि ध्वा का ळ ३१६

[OrderDescription]
,CREATED=24.09.20 16:15
,TRANSFERRED=2020/09/24 at 16:35:20
,PAGES=141
,TYPE=STD
,NAME=S0003716
,Book Name=M-1637-NIRNAYSINDHU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,